॥ १०२ ॥ इतिश्रीदे०ति०सप्तमस्कंधेत्रिंशोऽध्यायः ॥ ३०॥ श्रीलक्ष्मींमातरंरंगनाथाख्यंपितरंगुरुम् । नीलकंठःप्रकुरुतेनत्वागीताविमर्शिनीम् ॥१॥ चतुःसप्ततिपद्यैस्तुपार्वत्याख्यका
महः ॥ हिमालयेप्रादुरभूदितिसम्यागिहोच्यते ॥ २ ॥ पूर्वाध्याये--पुनश्चहिमवत्पृष्ठेप्रादुरासीच्चुतन्महइत्युक्तंतत्कथांपृच्छति । धराधराधीशेति॥धराधराःपर्वतास्तेषामधीशोहिमालय
स्तस्यमौलावित्यर्थः ॥ १ ॥ वक्तुरुत्साहार्थंकथाश्रवणेस्वोत्साहंदर्शयति । कोविरज्येतेति ॥ सुधामपिपिबताममराणांयोमृत्युः सदेवीकथामृतश्रवणवतोनैवभवेदित्यर्थः ॥ २ ॥
॥ ३ ॥ ४ ॥ ५ ॥ सौभाग्यरहितमैश्वर्यरहितंतदापराशक्तेःपुण्यश्लोकायादेव्याःपालयित्र्याजगन्मातुरभावाज्जातमित्यर्थः ॥६॥ ७ ॥ ग्रहाअपिविपरीतगतयःशास्तुःसत्यादेव्याअभावा

पृष्टंयत्तत्त्वयाराजन्नुक्तंसर्वंमहेशितुः ॥ रहस्यातिरहस्यंचकिंभूयःश्रोतुमिच्छसि॥१०२॥इति श्रीदे०म०सप्तमस्कंधेत्रिंशोऽध्यायः॥३०॥जनमे
जयउवाच॥ धराधराधीशमौलावाविरासीत्परंमहः ॥ यदुक्तंभवतापूर्वंविस्तरात्तद्वदस्वमे ॥ १ ॥ कोविरज्येतमतिमान्पिबञ्च्छक्तिकथामृतम्॥
सुधांतुपिबतांमृत्युःसनैतच्छृण्वतोभवेत् ॥ २ ॥ व्यासउवाच ॥ धन्योसिकृतकृत्योऽसिशिक्षितोऽसिमहात्मभिः ॥ भाग्यवानसियद्देव्यांनि
र्व्याजाभक्तिरस्तिते ॥ ३ ॥ शृणुराजन्पुरावृत्तंसतीदेहेग्निभर्जिते ॥ भ्रांतःशिवस्तुबभ्रामक्वचिद्देशेस्थिरोभवत् ॥ ४ ॥ प्रपंचभानरहितःसमा
धिगतमानसः ॥ ध्यायन्देवीस्वरूपंतुकालंनिन्येसआत्मवान् ॥ ५ ॥ सौभाग्यरहितंजातंत्रैलोक्यंसचराचरम् ॥ शक्तिहीनंजगत्सर्वंसाब्धि
द्वीपंसपर्वतम् ॥ ६ ॥ आनंदःशुष्कतांयातःसर्वेषांहृदयांतरे ॥ उदासीनाःसर्वलोकाश्चिंताजर्जरचेतसः ॥ ७ ॥ सदादुःखोदधौमग्नारोगग्रस्ता
स्तदाऽभवन् ॥ ग्रहाणांदेवतानांचवैपरीत्येनवर्तनम् ॥ ८ ॥ अधिभूताधिदैवानांसत्यभावानृपाऽभवन् ॥ अथाऽस्मिन्नेवकालेतुतारकाख्यो
महासुरः ॥ ९ ॥ ब्रह्मदत्तवरोदैत्योऽभवत्त्रैलोक्यनायकः ॥ शिवौरसस्तुयःपुत्रःसतेहंताभविष्यति ॥ १० ॥ इतिकल्पितमृत्युःसदेवदेवैर्महा
सुरः ॥ शिवौरससुताभावाज्जगर्जचननंदच ॥ ११ ॥ तेनचोपद्रुताःसर्वेस्वस्थानात्प्रच्युताःसुराः॥शिवौरससुताभावाच्चिंतामापुर्दुरत्ययाम् ॥
॥ १२ ॥ नांगनाशंकरस्यास्तिकथंतत्सुतसंभवः ॥ अस्माकंभाग्यहीनानांकथंकार्यंभविष्यति ॥ १३ ॥ इतिचिंतातुराःसर्वेजग्मुर्वैकुंठमंडले
शशंसुर्हरिमेकांतेसचोपायंजगादह ॥ १४ ॥ कुतश्चिंतातुराःसर्वेकामकल्पद्रुमाशिवा ॥ जागर्तिभुवनेशानीमणिद्वीपाधिवासिनी ॥ १५ ॥
अस्माकमनयादेवतदुपेक्षास्तिनान्यथा ॥ शिक्षैवेयंजगन्मात्राकृतास्मच्छिक्षणायच ॥ १६ ॥ लालनेताडनेमातुर्नाकारुण्यंयथार्भके ॥ तद्व
देवजगन्मातुर्नियंत्रागुणदोषयोः ॥ १७ ॥ अपराधोभवत्येवतनयस्यपदेपदे ॥ कोपरःसहतेलोकेकेवलंमातरंविना ॥ १८ ॥

ज्जाताइत्यर्थः ॥ ८ ॥९॥ ब्रह्मणादत्तोवरोयस्मैतादृशस्तस्मिन्नेवसंधौतारकासुरोऽभवदित्यर्थः॥ कोऽसौब्रह्मणावरोदत्तस्तमाह । शिवौरसास्त्विति ॥१०॥ ११ ॥ १२ ॥ १३ ॥ १४
॥ १५ ॥ अस्माकमनयादपराधादेवभगवत्याउपेक्षाऽस्तिसाचोपेक्षानास्मन्नाशाय किंत्वेतादृशोममापराधोनकर्तव्यइतिशिक्षणायेत्यर्थः ॥ १६ ॥ तत्रदृष्टांतमाह ॥ लालनेति । अर्भ
बाले ॥ १७ ॥ यद्यप्यपराधिनोवयंतथापितांमातरंजगज्जननींविनाकोऽपरः सहेताऽस्मदपराधंपदेपदेजायमानमित्यर्थः ॥ १८ ॥

॥ १९ ॥ स्वजाययालक्ष्म्यासहदेव्याआराधनार्थंविष्णुरपिदेवैःसहनिर्जगामेत्यर्थः ॥ २० ॥ २१ ॥ अंबाप्रीत्यर्थंयज्ञानानाविधास्तृतीयस्कंधोक्ताज्योतिष्टोमादयश्चतद्विधानज्ञाअंबायज्ञं चक्रिरेइत्यर्थः ॥ तृतीयादिव्रतानिहिमालयंप्रतिभगवत्यावक्ष्यमाणानि ॥२२॥ नामपारायणाःदेवीनामजापिनइत्यर्थः ॥ सूक्तपराअहंरुद्रेभिरित्यादिदेवीसूक्तजापिनइत्यर्थः॥नामपारा यणंतंत्रराजादितंत्रेषूक्तंनित्यकालपारायणंतस्मिन्नुत्सुकानिष्णाताःकेचिदित्यर्थः ॥२३॥ मंत्रपारायणम् ॥ मायाकुंडलिनीक्रियामधुमतीशुद्धाचकालीकलामातंगीविजयाजयाभगवती देवीशिवाशांभवीतिश्लोकोक्तरीत्याभुवनेश्वरीपारिजातेस्पष्टीकृतंतत्परास्तन्निष्णाताःकेचिदित्यर्थः ॥ कृच्छ्रादिव्रतंकृच्छ्रचांद्रायणादिकम् ॥अंतर्यागःप्रपंचयागःप्राणाग्निहोत्रंचप्रपंचसरो उक्तंतत्पराःकेचिदित्यर्थः ॥ २४ ॥ हृल्लेखयाबीजमंत्रेणभुवनेश्वरीमंत्रेणेत्यर्थः ॥ २५ ॥ भृगोर्दिनेभृगुवासरे ॥ सतस्मिन्नेवाकाशेस्त्रियमाजगाम बहुशोभमानामुमांहैमवतीमित्या

तस्माद्यूयंपरांबांतांशरणंयातमाचिरम् ॥ निर्व्याजयाचित्तवृत्त्यासावःकार्यंविधास्यति ॥१९॥ इत्यादिश्यसुरान्सर्वान्महाविष्णुःस्वजायया॥ संयुतोनिर्जगामाऽशुदेवैःसहसुराधिपः ॥ २० ॥ आजगाममहाशैलंहिमवंतंनगाधिपम्॥अभवंश्चसुराःसर्वेपुरश्चरणकर्मिणः ॥ २१ ॥ अंबाय ज्ञविधानज्ञाअंबायज्ञंचचक्रिरे ॥ तृतीयादिव्रतान्याशुचक्रुःसर्वेसुरानृप ॥ २२ ॥ केचित्समाधिनिष्णाताःकेचिन्नामपरायणाः ॥ केचित्सूक्त पराःकेचिन्नामपारायणोत्सुकाः ॥ २३ ॥ मंत्रपारायणपराःकेचित्कृच्छ्रादिकारिणः ॥ अंतर्यागपराःकेचित्केचिन्न्यासपरायणाः ॥ २४ ॥ हृल्लेखयापराशक्तेःपूजांचक्रुरतंद्रिताः ॥ इत्येवंबहुवर्षाणिकालोगाज्जनमेजय ॥ २५ ॥ अकस्माच्चैत्रमासीयनवम्यांचभृगोर्दिने ॥ प्रादुर्बभूव पुरतस्तन्महःश्रुतिबोधितम् ॥ २६ ॥ चतुर्दिक्षुचतुर्वेदैर्मूर्तिमद्भिरभिष्टुतम् ॥ कोटिसूर्यप्रतीकाशंचंद्रकोटिसुशीतलम् ॥ २७॥ विद्युत्कोटिसमा नाभमरुणंतत्परंमहः ॥ नैवचोर्ध्वंनतिर्यक्चनमध्येपरिजग्रभत् ॥२८ ॥ आद्यंतरहितंतत्तुनहस्ताद्यंगसंयुतम् ॥ नचस्त्रीरूपमथवानपुंरूपमथो भयम् ॥ २९ ॥ दीप्त्यापिधानंनेत्राणांतेषामासीन्महीपते ॥ पुनश्चधैर्यमालंब्ययावत्तेददृशुःसुराः ॥ ३० ॥ तावत्तदेवस्त्रीरूपेणाऽभादिव्यंमनो हरम् ॥ अतीवरमणीयांगींकुमारींनवयौवनाम् ॥ ३१ ॥ उद्यत्पीनकुचद्वंद्वनिंदितांभोजकुड्मलाम् ॥ रणत्किंकिणिकाजालसिंजन्मंजीरमेख लाम् ॥ ३२ ॥ कनकांगदकेयूरग्रैवेयकविभूषिताम् ॥ अनर्घ्यमणिसंभिन्नगलबंधविराजिताम् ॥ ३३ ॥ तनुकेतकसंराजन्नीलभ्रमरकुंतलाम् ॥ नितंबबिंबसुभगांरोमराजिविराजिताम् ॥ ३४ ॥ कर्पूरशकलोन्मिश्रतांबूलपूरिताननाम् ॥ कनत्कनकताटंकविटंकवदनांबुजाम् ॥ ३५ ॥ अष्टमीचंद्रबिंबाभललाटामायतभ्रुवम् ॥ रक्तारविंदनयनामुन्नसांमधुराधराम् ॥ ३६ ॥

दिक्श्रुतिबोधितंतन्महःशाक्तंप्रादुर्बभूवेत्यर्थः ॥ २६ ॥ वेदचतुष्टयेनचतुर्दिक्षुस्थितेनसेवितमित्यर्थः ॥२७॥ अरुणमारक्तमनुग्रहार्थस्वीकृतरजोगुणवत्त्वात् । एतद्रूपप्रतिपादितांश्रुतिंपठं तिनैवचोर्ध्वमिति ॥ परिजग्रभतस्थानत्रयेपिनपरिच्छिन्नमित्यर्थः ॥ २८ ॥ अथोभयंनपुंसकमपिनेत्यर्थः ॥२९ ॥ प्रथमतस्तस्यदीप्त्यानेत्रपिधानंजातंपश्चात्तदेवमहःस्त्रीरूपेणाऽभात्प्र काशंप्रापेत्यर्थः ॥ ३० ॥ ३१॥ उद्यदाविर्भवद्यत्पीनंकुचद्वंद्वंतेननिंदितंकमलकुड्मलंयस्याः ॥ रणच्छब्दायमानंयत्किंकिणिकाजालंतेनसिंजंत्यौशब्दायमानेमंजीरमेखलेनूपुरकांचीभू षणेयस्याः ॥ ३२ ॥ गलबंधःकंठभूषणम् ॥ ३३ ॥ तनुकेतकेबालकेतकपत्रेतिश्वेतेसंराजन्त्योनीलभ्रमरस्तद्वदतिनीलौकुंतलौकर्णकपोलमध्यस्थौकेशौयस्याः ॥ ३४॥ कनंतौदीप्यमानौ कनकताटंकौताभ्यांविटंकंसुंदरंवदनांबुजंयस्याः ॥ ३५ ॥ अष्टमीचंद्रोऽर्धचंद्रः ॥ उन्नसाम् । उन्नतनासिकाम् ॥ ३६ ॥

॥ ३७ ॥ निटिलंललाटम् ॥ ३८ ॥ त्रिलोचनामितिपुनरुक्तिर्लोचनानामतिसौंदर्यबोधनार्था ॥ ३९ ॥ ४० ॥ ४१ ॥ यतोबाष्पसंरुद्धनिःस्वनास्ततोवक्तुंनाऽशक्नुवान्नित्यर्थः ॥ इति
कर्तव्यतायांमूढाःसर्वेविलोकनंकृतवंतएवास्थिताइत्यर्थः ॥ ४२॥४३॥ नमोदेव्यैइतिवैदिकोमंत्रः ॥ प्रकृत्यैप्रकृतिश्चप्रतिज्ञादृष्टांतानुपरोधादितिसूत्रप्रतिपाद्यसाम्यावस्थमायोपाधि
ब्रह्मरूपिण्यै॥भद्रायैसकलकल्याणगुणरत्नाकरायै ॥ नियताःसंयताः ॥ ४४ ॥ तामग्निवर्णामिति ॥ अयमपिऋङ्मंत्रः ॥ अग्निसमानारुणवर्णाम्॥ तपसाज्ञानेनज्वलंतींदीप्यमानांस
ज्ञामित्यर्थः ॥ तथाचश्रुतिः तपसाचीयतेब्रह्मेतिमुंडके ॥ वैरोचनींविशेषेणदीप्ताम् ॥ कर्मफलेषुनिमित्तेषुब्राह्मणादिभिर्जुष्टांसेविताम् । दुर्गामष्टांगयोगात्मकदुःखरूपायासेनप्राप्य
ज्ञानेन ॥ सुतरासितरणयोग्येसंसारेतरसेतरणायतस्यैदुर्गायैनमोऽस्त्वित्यर्थः ॥ तस्यैइतिशेषः ॥ यद्वाअग्निशब्देनाग्निबीजंरेफोगृह्यते ॥ सरवर्णायस्यामंत्रेऽस्तितताम् तपःशब्दोमाया
चकस्तेनतुरीयस्वरईकारोगृह्यते ॥ तेनज्वलंतींतद्युक्तामित्यर्थः॥विरोचनःसूर्यस्तेनतद्बीजंहकारोगृह्यते सूर्यस्याबिंद्वात्मकपरमेश्वरत्वेनबिंदोश्चहकारात्मत्वेनप्रपंचसारेतृतीयचतुर्थपटलयो

कुंदकुड्मलदंताग्रांमुक्ताहारविराजिताम् ॥ रत्नसंभिन्नमुकुटांचंद्ररेखावतंसिनीम् ॥ ३७ ॥ मल्लिकामालतीमालाकेशपाशविराजिताम् ॥ का
श्मीरबिंदुनिटिलांनेत्रत्रयविलासिनीम् ॥ ३८ ॥ पाशांकुशवराभीतिचतुर्बाहुंत्रिलोचनाम् ॥ रक्तवस्त्रपरीधानांदाडिमीकुसुमप्रभाम् ॥३९॥
सर्वशृंगारवेषाढ्यांसर्वदेवनमस्कृताम् ॥ सर्वाशापूरिकांसर्वमातरंसर्वमोहिनीम् ॥ ४० ॥ प्रसादसुमुखीमंबांमंदस्मितमुखांबुजाम् ॥ अव्याज
करुणामूर्तिंददृशुःपुरतःसुराः ॥ ४१ ॥ दृष्ट्वातांकरुणामूर्तिंप्रणेमुःसकलाःसुराः ॥ वक्तुंनाशक्नुवन्किंचिद्बाष्पसंरुद्धनिःस्वनाः ॥ ४२ ॥ कथं
चित्स्थैर्यमालंब्यभक्त्याचानतकंधराः ॥ प्रेमाश्रुपूर्णनयनास्तुष्टुवुर्जगदंबिकाम् ॥ ४३ ॥ देवाऊचुः ॥ नमोदेव्यैमहादेव्यैशिवायैसततंनमः॥
नमःप्रकृत्यैभद्रायैनियताःप्रणताःस्मताम्॥४४॥ तामग्निवर्णांतपसाज्वलंतींवैरोचनींकर्मफलेषुजुष्टाम् ॥ दुर्गांदेवींशरणमहंप्रपद्येसुतरसितरसेन
मः ॥ ४५ ॥ देवींवाचमजनयंतदेवास्तांविश्वरूपाः पशवोवदंति ॥ सानोमंद्रेषमूर्जंदुहानाधेनुर्वागस्मानुपसुष्टुतैतु ॥ ४६ ॥ कालरात्रींब्रह्म
स्तुतांवैष्णवींस्कंदमातरम् ॥ सरस्वतीमदितिंदक्षदुहितरंनमामःपावनांशिवाम् ॥ ४७ ॥

रुक्तत्वात् ॥ तेनहकारयुक्तामित्यर्थः ॥ तथाचमायाबीजरूपिणींदुर्गांशरणमहमित्यादिपूर्वेणसमानार्थम् ॥ नारायणोपनिषद्भाष्येतुतांदुर्गांदेवींशरणमहंप्रपद्ये॥कींदृशीमग्निसमानव
तपसास्वकीयसंतापेनज्वलंतीमस्मच्छत्रून्दहंतींविशेषेणरोचतेस्वयमेवप्रकाशतेइतिविरोचनः परमात्मातेनदृष्टत्वाद्वैरोचनींकर्मफलेषुस्वर्गपशुपुत्रादिषुनिमित्तभूतेषुजुष्टामुपासकैः से
ताम् ॥ हेसुतरसिसुष्टुसंसारतरणहेतोहेदेवि ॥ तरसेतारयित्र्यैतुभ्यंनमोस्त्वित्युक्तंमाधवाचार्यैः ॥ ४५ ॥ देवींवाचमिति ॥ देवाःप्राणाः यांदेवींद्योतमानांवाचंवैखरीरूपामजनयंत
त्पादितवंतस्तांविश्वरूपाःपशवोऽस्मदादयोवदंति ॥ सर्वव्यवहारसिद्ध्यर्थंसेयंसर्वव्यवहारोपयोगिनीधेनुःकामदुघामंद्रामादयित्रीप्रतिष्ठामानदानादिना इष्टमूर्जंदुहानाऽन्नबलदा
वाग्रूपाभगवतीनोऽस्मान्सुष्टुतासतीउपैतुप्राप्नोत्वित्यर्थः ॥ अयमपिऋङ्मंत्रएव ॥ ४६ ॥ कालरात्रीमिति ॥ अयमपिदेव्यथर्वशिरःस्थोमंत्रः ॥ सर्वमारकस्यापिकालस्यरात्रीनाशि
त्यर्थः ॥ प्रलयेकालस्यापिनाशात् ॥ ब्रह्मस्तुतांमधुकैटभवधस्यसमयेब्रह्मणास्तुतांब्रह्मणावेदेनवास्तुताम् ॥ वैष्णवींविष्णुशक्तिंलक्ष्मीम् ॥ स्कंदमातरंपार्वतींशिवशक्तिम् ॥ सरस्वती
ब्रह्मशक्तिम् ॥ अदितिंदेवमातरंदक्षदुहितरम् ॥ सतीनाम्नीम् एतादृशींनानारूपधरांशिवाभुवनेश्वरींपावनांनमामइत्यर्थः ॥ ४७ ॥

महालक्ष्म्यैचेति ॥ इयमपिदेव्यथर्वशिरःस्थागायत्री ॥ तत्रचतुर्थीद्वितीयार्थे ॥ महालक्ष्मींविद्महेजानीमइत्यर्थः ॥ तथासर्वशक्तिंधीमहिध्यायामइत्यर्थः ॥ तदितिलुप्तसप्तम्यंतम् ॥ तत्तत्त्वज्ञानेध्यानेचनोऽस्मान्सादेवीप्रचोदयाप्रेरयत्वित्यर्थः ॥४८॥ चतुष्पाद्ब्रह्मात्मिकांनमस्करोतिनमोविराडिति ॥ ४९ ॥ यदज्ञानाद्यत्स्वरूपस्यापरिज्ञानादित्यर्थ ॥ ५० ॥ ५१ ॥ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ शिवांगजाच्छिवांरसपुत्रात् ॥६०॥ सर्वज्ञपुरतइति ॥ सर्वज्ञायास्तवपुरतोऽस्माभिःपामरैर्जनैःकिंवक्तव्यंकिंनिवेदनीयं

महालक्ष्म्यैचविद्महेसर्वशक्त्यैचधीमहि ॥ तन्नोदेवीप्रचोदयात् ॥ ४८ ॥ नमोविराट्स्वरूपिण्यैनमःसूत्रात्ममूर्तये ॥ नमोऽव्याकृतरूपिण्यैनमः श्रीब्रह्ममूर्तये ॥ ४९ ॥ यदज्ञानाज्जगद्भातिरज्जुसर्पस्रगादिवत् ॥ यज्ज्ञानाल्लयमाप्नोतिनुमस्तांभुवनेश्वरीम् ॥ ५० ॥ नुमस्तत्पदलक्ष्यार्थांचिदेकरसरूपिणीम् ॥ अखंडानन्दरूपांतांवेदतात्पर्यभूमिकाम्॥५१॥ पंचकोशातिरिक्तांतामवस्थात्रयसाक्षिणीम्॥पुनस्त्वंपदलक्ष्यार्थांप्रत्यगात्मस्वरूपिणीम् ॥५२॥ नमःप्रणवरूपायैनमोह्रींकारमूर्तये ॥ नानामंत्रात्मिकायैतेकरुणायैनमोनमः॥५३॥इतिस्तुतातदादेवैर्मणिद्वीपाधिवासिनी ॥ प्राहवाचामधुरयामत्तकोकिलनिःस्वना ॥५४॥ श्रीदेव्युवाच ॥ वदंतुविबुधाःकार्यंयदर्थमिहसंगताः ॥ वरदाहंसदाभक्तकामकल्पद्रुमाऽस्मिच ॥ ५५ ॥ तिष्ठंत्यांमयिकाचिंतायुष्माकंभक्तिशालिनाम् ॥ समुद्धरामिमद्भक्तान्दुःखसंसारसागरात् ॥ ५६ ॥ इतिप्रतिज्ञांमेसत्यांजानीथविबुधोत्तमाः ॥ इतिप्रेमाकुलांवाणींश्रुत्वासंतुष्टमानसाः ॥ ५७ ॥ निर्भयानिर्जराराजन्नूचुर्दुःखंस्वकीयकम् ॥ देवाऊचुः ॥ नाऽज्ञातंकिंचिदप्यत्रभवत्याऽस्तिजगत्त्रये ॥ ५८ ॥ सर्वज्ञयासर्वसाक्षिरूपिण्यापरमेश्वरि ॥ तारकेणाऽसुरेन्द्रेणपीडिताःस्मोदिवानिशम् ॥ ५९ ॥ शिवांगजाद्वधस्तस्यनिर्मितोब्रह्मणाशिवे॥शिवांगनातुनैवास्तिजानासित्वंमहेश्वरि ॥ ६० ॥ सर्वज्ञपुरतःकिंवावक्तव्यंपामरैर्जनैः ॥ एतदुद्देशतःप्रोक्तमपरंतर्कयांबिके ॥ ६१ ॥ सर्वदाचरणांभोजेभक्तिःस्यात्तवनिश्चला ॥ प्रार्थनीयमिदंमुख्यमपरंदेहहेतवे ॥ ६२ ॥ इतितेषांवचःश्रुत्वाप्रोवाचपरमेश्वरी ॥ ममशक्तिस्तुयागौरीभविष्यतिहिमालये ॥ ६३ ॥ शिवायसाप्रदेयास्यात्सावःकार्यंविधास्यति ॥ भक्तिर्यच्चरणांभोजेभूयाद्युष्माकमादरात् ॥ ६४ ॥ हिमालयोहिमनसामामुपास्तेऽतिभक्तितः ॥ ततस्तस्यगृहेजन्ममममप्रियकरंमतम् ॥ ६५ ॥ व्यासउवाच ॥ हिमालयोऽपितच्छ्रुत्वाऽत्यनुग्रहकरंवचः ॥ बाष्पैःसंरुद्धकंठाक्षोमहाराज्ञींवचोऽब्रवीत् ॥ ६६ ॥

त्वंकिंनजानासीत्यर्थः ॥ एतदुद्देशतइति ॥ इदंयदुक्तंतदुद्देशतोमुख्यत्वेनयत्स्थितंतदुक्तम् ॥ अपरमन्यत्दुःखमस्माकंयदस्तितत्कियत्पर्यंतंवक्तव्यंतत्त्वमेवसर्वज्ञातर्कयजानीहीत्यर्थः ॥ ६१ ॥ मुख्यमभिलषितंप्रार्थयंति । सर्वदेति ॥ देहहेतवेदेहाभिमाननिमित्तमपरंप्रार्थनीयमित्यर्थः ॥ ६२ ॥ याहिमालयेअधुनाभविष्यतिसाशिवायदेया ॥ साशक्तिर्वःकार्यंस्वजन्यपुत्रद्वारातारकासुरवधरूपंकरिष्यतीत्यर्थः॥ ६३ ॥ ६४ ॥ ननुहिमालयेकिमितिभवत्यावतारोगृह्यतेतत्राह । हिमालयोहीति ॥ ६५ ॥ महाराज्ञींसर्वेश्वरींभुवनेश्वरीम् ॥ ६६ ॥

मद्भक्त्यातुष्टात्वंमद्गृहेऽवतारंगृह्णासीतिकेवलंमल्लालनार्थमेव वस्तुतस्तुयस्यानुग्रहमिच्छसितंपुरुषंमहत्तरंकुरुषेकेवलंस्वेच्छयैवेत्याह । महत्तरमिति तथाचश्रुतिः ॥यंकामयेतमुग्रंकृणो
तंब्रह्माणंतमृषिंतंसुमेधामिति ॥ इत्थंयदिनास्तितर्हितत्राह । नोचेदिति ॥ क्कत्वमतिदूरासनोवाचामपिअगोचरासच्चिदानंदरूपिणी ॥ ६७ ॥ एतादृश्यास्तवपितृत्वंजनकत्वंम
जन्मशतैरनंतजन्मभिरपिअसंभाव्यंसंभावनाविषयोपिनभवतितत्त्वत्पितृत्वंत्वंददासितस्मात्त्वदिच्छैवकेवलंकारणंनतुममयोग्यतादिकमित्यर्थः ॥ तदेवाह । अश्वमेधेति ॥ ६८ ॥ अ
स्वभाग्यंवर्णयाति ॥ अद्यप्रपंचइति ॥ अहोअस्यहिमालयस्यजगन्माता सुताकन्याभवत् ॥ धन्योऽसौभाग्यवानितिप्रपञ्चेअद्याऽद्यप्रभृतिकीर्तिःस्यादित्यन्वयः ॥ ६९ ॥ पर
त्त्यनुग्रहेणप्रेमपूर्णांतःकरणःस्वमुखेनैवस्वभाग्यंपुनर्वर्णयति । यस्यास्त्विति ॥ कोवास्यान्नकोपीत्यर्थः ॥ ७० ॥ येषांवंशेमादृशोभाग्यवानस्तितेषांकिंस्थानंब्रह्मलोकाद्यपेक्षयाऽधि
किंनिर्मितंस्यात्तन्नजानेइतिभावः ॥ ७१॥ पुनःप्रार्थयथेति॥इदंयथेति॥इदमतिदुर्लभंत्वत्पितृत्वंयथात्वयाकरुणयादत्तंतथेत्यन्वयः॥७२॥ त्वमेवाहमिति॥तवममचाभेदोयेनस्यात्तादि
र्थः ॥ ७३ ॥ ७४ ॥ इतिश्रीदेवीभागवतातिलकेसप्तमस्कन्धेएकत्रिंशोऽध्यायः ॥ ३१ ॥ पंचाशद्भिरथश्लोकैरात्मतत्त्वनिरूपणम् ॥ करोतिजगदंबासास्वमुखेनेतिचोच्यते ॥ १ ॥
मालयंपुरस्कृत्यसर्वान्देवान्देवीवरवस्तूपदेशंकरोति । शृण्वंत्विति ॥ व्याहरंत्याःकथयंत्याः ॥ १ ॥ अहमेवेति ॥ पूर्वंतुसृष्टेस्तुपूर्वमहमात्मरूपिण्येवाऽसबभूव मत्तोन्यत्किंचिदपिन

महत्तरंतंकुरुषेयस्यानुग्रहमिच्छसि ॥ नोचेत्क्काहंजडःस्थाणुःक्कत्वंसच्चित्स्वरूपिणी ॥ ६७ ॥ असंभाव्यंजन्मशतैस्त्वत्पितृत्वंममाऽनघे ॥ अ
श्वमेधादिपुण्यैर्वापुण्यैर्वातत्समाधिजैः ॥ ६८ ॥ अद्यप्रपंचेकीर्तिःस्याज्जगन्मातासुताऽभवत् ॥ अहोहिमालयस्यास्यधन्योसौभाग्यवानिति
॥ ६९ ॥ यस्यास्तुजठरेसंतिब्रह्मांडानांचकोटयः ॥ सैवयस्यसुताजाताकोवास्यात्तत्समोभुवि ॥ ७० ॥ नजानेस्मत्पितृणांकिंस्थानंस्यान्नि
र्मितंपरम् ॥ एतादृशानांवासाययेषांवंशेस्तिमादृशः ॥ ७१॥ इदंयथाचदत्तंमेकृपयाप्रेमपूर्णया ॥ सर्ववेदांतसिद्धंचत्वद्रूपंब्रूहिमेतथा ॥ ७२॥
योगंचभक्तिसहितंज्ञानंचश्रुतिसंमतम् ॥ वदस्वपरमेशानित्वमेवाहंयतोभवेः ॥ ७३ ॥ व्यासउवाच ॥ इतितस्यवचःश्रुत्वाप्रसन्नमुखपंकजा॥
वक्तुमारभतांबासारहस्यंश्रुतिगूहितम् ॥ ७४ ॥ इतिश्रीदे०म०सप्तमस्कंधेदेवीगीतायामेकत्रिंशोऽध्यायः ॥ ३१ ॥ श्रीदेव्युवाच ॥ शृण्वंतु
निर्जराःसर्वेव्याहरंत्यावचोमम ॥ यस्यश्रवणमात्रेणमद्रूपत्वंप्रपद्यते ॥ १ ॥ अहमेवाऽऽसपूर्वंतुनान्यत्किंचिन्नगाधिप ॥ तदात्मरूपंचित्सं
वित्परब्रह्मैकनामकम् ॥ २ ॥अप्रतर्क्यमनिर्देश्यमनौपम्यमनामयम् ॥ तस्यकाचित्स्वतःसिद्धाशक्तिर्मायेतिविश्रुता ॥ ३ ॥

सजातीयविजातीयस्वगतभेदशून्यमात्मतत्त्वमेवाऽऽसेत्यर्थः ॥ तथाचश्रुतिः ॥ आत्मावाइदमेकएवाग्रआसीन्नान्यत्किंचिदिति ॥ तदात्मरूपमिति ॥ तदेवात्मरूपंब्रह्मैकनामकं
ति ॥ सत्यंज्ञानमनंतंब्रह्मेत्यादिकाजगत्कारणप्रतिपादकश्रुतिषुप्रतिपादिताःशब्दास्तस्यैवात्मस्वरूपस्यवाचकाःसंतीत्यर्थः ॥ २ ॥ तथाचसर्ववेदप्रतिपाद्यमात्मरूपमेवासेतिसम
याध्यायोक्तःसर्वपदानांब्रह्मण्यात्मरूपेसमन्वयउक्तोवेदितव्यइति ॥ कीदृक्कतदात्मरूपमस्तीतिचेत्तत्राह ॥ अप्रतर्क्यमिति ॥ अनुमानाविषयश्रुत्यैकसमधिगम्यमित्यर्थः ॥ अनिर्दे
श्रुत्यापिजातिगुणक्रियासंज्ञाभिर्निर्देष्टुमशक्यमित्यर्थः ॥ अनौपम्यमिति ॥ यदितत्सदृशोद्वितीयः पदार्थोजगंत्यांस्यात्तदुपमानेनसआत्मोपमेयः स्यान्नतुतदनौपम्यम् ॥ अनामय
ति ॥ जायतेवर्धतइत्यादिषड्भावविकारशून्यामित्यर्थः॥ तेषांविकाराणांदेहोपाधिनिष्ठत्वादस्यचात्मनोदेहाभावात्तद्विकाररहितमनामयमेवैतदित्यर्थः ॥ एतादृशंनिर्गुणंकथंजगत्का
मितिचेत्तत्राह । तस्येति ॥ काचिदनिर्वचनीयातस्यममात्मरूपस्यस्वतःसिद्धानादिभूताशक्तिरस्ति ॥ यामायेत्यादिपदैःसर्वश्रुतौविश्रुताप्रसिद्धास्ति मायांतुप्रकृतिंविद्यात् मायां
षानारसिंहीत्यादिषु ॥ ३ ॥

साक्षीदृशीवर्ततेतदाह । नसतीति॥अत्रविरोधतइत्यावृत्त्यास्थानत्रयेपियोज्यम् ॥ब्रह्मवत्कालत्रयाबाध्यासतीन ब्रह्मज्ञानेनबाध्यत्वरूपविरोधात् ॥ नाऽपिवंध्यापुत्रवदसती व्यावहारिक
सत्तातत्त्वंविरोधात्॥नाप्युभयात्मासत्वासत्त्वविशिष्टा॥ विरुद्धधर्मयोःसत्त्वासत्त्वयोरेकत्रसहावस्थानविरोधादेतत्त्रयविलक्षणाकाचिदनिर्वचनीयावस्तुभूताऽस्तिसर्वदाअनादिःयावन्मोक्ष
स्थायिन्यस्तीत्यर्थः॥तथाचतापनीयश्रुतिः॥मायाचतमोरूपानुभूतेस्तदेतज्जडंमोहात्मकमनंतंतुच्छमिदंरूपस्यास्यव्यंजिकानित्यनिवृत्ताविमूढैरात्मैवदृष्टास्यसत्त्वमसत्त्वंचदर्शयतीति ४।
तत्रदृष्टांतमाह।पावकस्येति॥सहजानादिध्रुवायावन्मोक्षस्थायिनीमायाशक्तिर्ममास्तीत्यर्थः॥ एतेनमायाशक्त्यासद्वितीयत्वंब्रह्मणोस्तीतिकथंजगत्सृष्टेःपूर्वंब्रह्मसजातीयविजातीयस्वगत
भेदशून्यमितिशंकापरास्ता॥शक्तेःशक्तानतिरेकात्॥नहिवह्निशक्तिर्वह्नेःपृथक्त्वेनकाचित्कदाचिद्गृह्यते॥किंचद्वितीयःसत्यपदार्थोनास्तीत्येवैकमेवाद्वितीयंब्रह्मेति श्रुतेरर्थः॥तथाचाऽसत्या
माययासाद्वितीयत्वेऽपिदोषाभावात् ॥५॥ नन्वेतादृश्याभुवनेश्वर्यास्तवोच्चनीचजीवसर्जनेवैषम्यनैर्घृण्यदोषआपतेदितिचेत्तत्राह । तस्यांकर्माणीति ॥ जीवाःकर्माणिकालश्चसर्वेअनादय
स्तेचसुषुप्तौयथाप्रतिदिवसंव्यवहारोलीनोभवतितथासंचरेप्रलयकालेतस्यांमायायामभेदेनलीनाःस्युः ॥ तथाचयथायथायस्यजीवस्यकर्माणिभवंतितथामयाफलंदीयतइतिनममवैषम्यनै
र्घृण्यदोषगंधोपीतिभावः ॥६॥ तादृशीममशक्तिर्जीवकर्मकालविशिष्टातयायुक्ताऽहंनिर्गुणापिबीजात्मतांजगत्कारणतांगताऽस्मीत्याह।स्वशक्तेश्चेति ॥ ननुतवशक्तिर्यथात्वांनव्यामोहय

नसतीसानाऽसतीसानोभयात्माविरोधतः ॥ एतद्विलक्षणाकाचिद्वस्तुभूताऽस्तिसर्वदा ॥ ४ ॥ पावकस्योष्ण्यतेवेयमुष्णांशोरिवदीधितिः ॥ चंद्रस्यचंद्रिकेवेयंममेयंसहजाध्रुवा ॥५॥ तस्यांकर्माणिजीवानांजीवाःकालाश्चसंचरे ॥ अभेदेनविलीनाःस्युःसुषुप्तौव्यवहारवत् ॥ ६ ॥ स्वशक्तेश्चसमायोगादहंबीजात्मतांगता ॥ स्वाधारावरणात्तस्यादोषत्वंचसमागतम् ॥ ७ ॥ चैतन्यस्यसमायोगान्निमित्तत्वंचकथ्यते ॥ प्रपंचपरिणामाच्चसमवायित्वमुच्यते ॥ ८ ॥ केचित्तांतपइत्याहुस्तमःकेचिज्जडंपरे ॥ ज्ञानंमायांप्रधानंचप्रकृतिंशक्तिमप्यजाम् ॥ ९ ॥

तितथाजीवशक्तिरपिजीवंनव्यामोहयेत्तथाचमुक्ताएवजीवाइतिसृष्टिर्निरर्थिकेतिचेत्तत्राह ।स्वाधारावरणादिति ॥ स्वंमायातस्याधारआत्मातस्यावरणादाच्छादनादस्यामायायादोषत्व
मप्यस्तीत्यर्थः ॥ अयंभावः ॥ मायायारूपद्वयंमायाविद्यात्मकमस्ति मायाचविद्याचस्वयमेवभवतीतिश्रुतेः ॥ तत्रप्रथमायाममशक्तिर्मायातस्याःस्वाश्रयव्यामोहकारित्वाभावेपिजीवा
श्रिताविद्यारूपस्यद्वितीयमायास्वरूपस्यस्वाश्रयव्यामोहकारित्वमस्त्येवेतितज्जीवमोक्षार्थंसृष्टिःसार्थिकैवेति ॥७॥ ननुतथापिलोकेकार्यमात्रंप्रत्युपादानकारणनिमित्तकारणयोरपेक्षास्ति
घटादिषुदर्शनाज्जगतउत्पादनकर्त्रीत्वंत्वेकैवेतिकथमत्रकारणद्वयसद्भावइतिचेत्तत्राह । चैतन्यस्येति॥समायोगान्मायासमागमाच्चैतन्यस्यमायायांप्रतिबिंबितस्यचिदाभासस्यनिमित्तत्वं
निमित्तकारणत्वंकथ्यतइत्यर्थः ॥प्रपंचेति॥ प्रपंचरूपेणपरिणामात्समवायित्वमुपादानकारणत्वमुच्यतेमायायाइतिशेषः॥ चिदाभासोनिमित्तकारणंमायोपादानकारणमितिविभागः ॥
अधिष्ठानभूतंशुद्धबिंबभूतंचैतन्यंतुविवर्तोपादानमित्यर्थात्सिद्धम् ॥८॥ तस्यामायायाःसद्भावप्रतिपादकानिवचनानिश्रुतिप्रोक्तानिकथयति । केचित्तामिति ॥ केचिच्छाखिनस्तांमायां
तपइतिवदंतीत्यर्थः ॥ तथाचश्रुतिः ॥ तपसाचीयतेब्रह्मेतिमुंडके ॥ तमःकेचिदिति । तथाचश्रुतिः ॥ नासदासीन्नोसदासीदित्यादि ॥ तमआसीत्तमसागूढमग्रेइति ॥ तदेतज्जडमिति
तापनीयेजडत्वमुक्तं सऐक्षत लोकानुसृजाइति श्रुतौज्ञानत्वमुक्तम्॥अजामायाप्रधानप्रकृतिशक्तिपरादयःशब्दाः श्वेताश्वतरशाखायांप्रसिद्धाः ॥ तथाचसर्ववेदसंमतेयंमायेतिभावः॥९॥

॥१०॥तदेवाह । एवमिति ॥ ननुमायायाजडत्वंमिथ्यात्वंचकुतइतिचेत्तत्राह । तस्याइति॥तस्यादृश्यत्वात्स्वाधिष्ठानज्ञाननाश्यत्वाच्चजडत्वंमिथ्यात्वंचेत्यर्थः॥ यद्यद्दृश्यंतत्तज्जडंयथ
घटादीत्यादिव्याप्तेः॥स्वाधिष्ठानज्ञाननाश्यत्वंमिथ्यात्वमितिमिथ्यात्वलक्षणात् ॥ ११ ॥ एवंमायायाजडत्वंमिथ्यात्वंचोपपाद्यआत्मनस्तदुभयत्वंनास्तीत्युपपादयति । चैतन्यस्येति
यदिचैतन्यस्यदृश्यत्वंस्यात्तर्हितज्जडमेवभविष्यति॥यद्यद्दृश्यंतत्तज्जडमितिव्याप्तेः॥तथाचसर्वस्यजडत्वात्प्रकाशकाभावाज्जगदांध्यप्रसंगस्तस्मान्नतद्दृश्यमित्यर्थः ॥ ननुतस्यदुर्दृश्यत
भावेतदस्तित्वेप्रमाणाभावात्तदभावएवप्रसज्येतेतिचेत्तत्राह । स्वप्रकाशंचेति ॥ यदीदंचैतन्यंपरप्रकाशंस्यात्तर्हिसपरःकेनान्येनप्रकाशितःसोप्यन्यःकेनप्रकाशितइत्यनवस्थास्यात्॥ न
स्वेनापिस्वंप्रकाशितमेकस्यैवकर्तृत्वंकर्मत्वविरुद्धधर्मद्वयवत्त्वाभावात् । तस्मात् यथादीपःस्वयंप्रकाशःपरप्रकाशकश्चतद्वन्मदीयंचैतन्यमपि ॥ हेपर्वतस्वयंभासमानमन्येषांसूर्यादीनां
सकंविद्धीत्यर्थः ॥ तथाचश्रुतिः॥नतत्रसूर्योनचंद्रतारकंनेमाविद्युतोभांतिकुतोयमग्निः॥तमेवभांतमनुभातिसर्वंतस्यभासासर्वमिदंविभातीति येनसूर्यस्तपतितेजसेद्धइतिच ॥१२॥१३
॥१४॥यस्माद्धेतोर्नित्यत्वंसंविद्रूपस्योक्तंतमेवहेतुमुपपादयति ॥ जाग्रदिति॥अवस्थात्रयेपिदृश्यस्यपदार्थजातस्यव्यभिचारोयतस्तत्संविदोव्यभिचाराभावश्चयतस्तस्मात्संविदोनित्य

विमर्शइतितांप्राहुःशैवशास्त्रविशारदाः ॥ अविद्यामितरेप्राहुर्वेदतत्त्वार्थचिंतकाः ॥ १० ॥ एवंनानाविधानिस्युर्नामानिनिगमादिषु ॥ तस्या
जडत्वंदृश्यत्वाज्ज्ञाननाशात्ततोसती ॥ ११ ॥ चैतन्यस्यनदृश्यत्वंदृश्यत्वेजडमेवतत् ॥ स्वप्रकाशंचचैतन्यंनपरेणप्रकाशितम् ॥ १२ ॥
अनवस्थादोषसत्त्वान्नस्वेनाऽपिप्रकाशितम् ॥ कर्मकर्त्रीविरोधःस्यात्तस्मात्तद्दीपवत्स्वयम् ॥ १३ ॥ प्रकाशमानमन्येषांभासकंविद्धिपर्वत ॥
अतएवचनित्यत्वंसिद्धंसंवित्तनोर्मम ॥१४॥ जाग्रत्स्वप्नसुषुप्त्यादौदृश्यस्यव्यभिचारतः ॥ संविदोऽव्यभिचारश्चनानुभूतोऽस्तिकर्हिचित्॥१५॥
यदितस्याऽप्यनुभवस्तर्ह्ययंयेनसाक्षिणा ॥ अनुभूतःसएवाऽत्रशिष्टःसंविद्वपुःपुरा॥१६॥अतएवचनित्यत्वंप्रोक्तंसच्छास्त्रकोविदैः ॥ आनंदरूप
ताचाऽस्याःपरप्रेमास्पदत्वतः ॥ १७ ॥ मानभूवंहिभूयासमितिप्रेमात्मनिस्थितम् ॥ सर्वस्याऽन्यस्यमिथ्यात्वादसंगत्वंस्फुटंमम ॥ १८ ॥

मित्यर्थः ॥ ननुसंविदोपिव्यभिचारोस्तुतत्राह।संविदइति ॥ योऽहंजागरितंपश्यामिसएवाहंस्वप्नंपश्यामिसएवाऽहंसुषुप्तंपश्यामीत्यनुभवेयथाऽवस्थात्रयस्याभावोनुभूयतेनतथाकर्हिचि
कदापिसंविदोऽभावोनुभूयतेतस्मादनिच्छतापिसंविदोनित्यत्वमाश्रयणीयामित्यर्थः ॥ १५ ॥ ननुबौद्धैःसंविदोऽप्यभावोनुभूयतेअतएवतेबौद्धायत्सत्तत्क्षणिकमितिव्याप्यत्यज्ञानस्याप्यां
त्यत्वमिच्छंतीतिचेत्तत्राह । यदितस्यापीति ॥यदितस्यसंविद्रूपाभावस्यानुभवस्तर्हियेनसाक्षिणातस्यसंविद्रूपस्याऽयमभावोनुभूतःसएवाऽत्रसाक्षीसंविद्वपुर्ज्ञानशरीरोवशिष्टइति॥ सा
ज्ञानंनित्यमेवसर्वैरंगीकर्तव्यामित्यर्थः॥ १६॥तत्रशास्त्रंविदनुभवंप्रमाणयति॥अतएवेति॥अधुनात्मनःसुखरूपत्वमुपपादयति॥आनंदरूपतेति । अस्याःसंविदोयतःपरप्रेमास्पदत्वमनुभूय
तस्मादस्याःसंविदआनंदरूपतासुखरूपताऽस्तीत्यर्थः॥नह्यसुखंपरप्रेमास्पदंभवतीति॥तदुक्तंसूतसंहितायाम्॥असुखस्यनहिप्रेमास्पदत्वंपरिदृश्यते।१७॥तत्रानुभवंदर्शयति।मानभूवंही
हियतोऽहंमाभूवमितिन॥किंतुभूयासमेवेतिप्रेमसर्वलोकस्यात्मनिस्थितमस्ति ॥ नह्येतदात्मनःसुखरूपत्वाभावेसंभवती ॥ तस्मात्प्राणिमात्रस्याऽनुभवादानंदात्मतासंविदोऽस्त्येवेत्य
आत्मनोऽसंगत्वमुपपादयति॥सर्वस्वेति॥ सर्वप्रपंचस्यमायानिर्मितत्वेनमिथ्यात्वात् मिथ्यापदार्थस्यसर्पादे रज्ज्वादिस्वसंबंधइवात्मनोपिमिथ्याप्रपंचेनासंबंधादसंगत्वंस्पष्टमेवेत्यर्थः॥१

सर्वस्यपरिच्छेदकस्यमिथ्यात्वादेवात्मनःपरिच्छेदोऽपिनास्तीत्याह।अपरिच्छिन्नतेतिं॥अतएवसर्वस्यामिथ्यात्वादेवममात्मरूपिण्याअपरिच्छिन्नताऽपिमतेत्यर्थः ॥अत्रकेचिज्ज्ञानस्वरू
पोनात्मा।किंत्वात्मनोधर्मोज्ञानमितिवदंतितन्मतंखंडयति । तच्चज्ञानमिति॥यदिज्ञानमात्मधर्मःस्यात्तदात्मनोजडत्वापत्तिः॥ज्ञानातिरिक्तस्यजडत्वात्तस्माज्ज्ञानंनात्मनोधर्मइत्यर्थः १९॥
किंचज्ञानस्यजडशेषत्वंघटादिष्वदर्शनान्नकुत्रापिदृष्टंनचसंभवति॥तमःप्रकाशयोस्तयोर्धर्मधर्मित्वमित्यर्थः॥नन्वात्मानजडःकिंतुचिद्रूपएवेति तद्धर्मत्वंज्ञानस्यसंभवतीतिचेत्तत्राह। चिद्ध
र्मत्वमिति॥उभयोश्चितोरेकत्वादात्मनोज्ञानस्यचचिद्रूपस्यनधर्मिधर्मभावःसंभवतीत्यर्थः॥भेदेहिसतिधर्मधर्मिभावः ॥यदिपुनर्ज्ञानमात्मनश्चिद्रूपाद्भिन्नंस्वीक्रियते तर्हितज्ज्ञानंचितोभिन्न
माचिदेवस्यादिति॥तदुक्तंसूतसंहितायांयज्ञवैभवखंडे॥चितोऽन्यशेषताभावाच्चितोचिच्छेषतानहि ॥ शरावादिपदार्थानांचितनत्वप्रसक्तितः ॥ चिच्छेषत्वंचनास्त्येवाचितश्चिन्नहिभि
द्यते॥ भिद्यतेचेदचिच्चित्स्याच्चितोचित्त्वंविरुध्यते॥ तथाचिच्चेतनस्यापिनशेषत्वमवाप्नुयात् ॥ शेषत्वेसतितत्सिद्धिस्तात्सिद्धौशेषताचितः॥ अतोन्यशेषतालोकाचितोभ्रांत्याप्रतीयतइति
॥ २० ॥ उपसंहरति । तस्मादिति ॥ तस्मादात्माज्ञानरूपएवेत्यर्थः ॥२१॥ इत्थंसृष्टेःपूर्वसशक्तिकस्यात्मरूपस्यास्थितिमुक्त्वाऽनंतरंतस्मादात्मनःसृष्टिमाह । सपुनरिति ॥ सआत्मा
पुनःकामइच्छाकर्मादृष्टमनेकविधम् ॥आदिनाजीवास्तद्युक्तायामायाशक्तिस्तया ॥ पूर्वयोजगतोऽनुभवस्तज्जन्योयः संस्कारस्तस्माद्धेतोःकालेनकृतोयःकर्मणांविपाकोनामपरिपाकः ॥

अपरिच्छिन्नताप्येवमतएवमताामम ॥ तच्चज्ञानंनात्मधर्मोधर्मत्वेजडतात्मनः ॥ १९ ॥ ज्ञानस्यजडशेषत्वंनदृष्टंनचसंभवि ॥ चिद्धर्मत्वंतथा
नास्तिचितश्चिन्नहिभिद्यते ॥ २० ॥ तस्मादात्माज्ञानरूपः सुखरूपश्चसर्वदा ॥ सत्यःपूर्णोप्यसंगश्चद्वैतजालविवर्जितः ॥ २१ ॥ सपुनः
कामकर्मादियुक्तयास्वीयमायया ॥ पूर्वानुभूतसंस्कारात्कालकर्मविपाकतः ॥ २२ ॥ अविवेकाच्चतत्त्वस्यसिसृक्षावान्प्रजायते ॥ अबुद्धिपूर्वः
सर्गोऽयंकथितस्तेनगाधिप ॥ २३ ॥ एतद्धियन्मयाप्रोक्तंममरूपमलौकिकम् ॥ अव्याकृतंतदव्यक्तंमायाशबलमित्यपि ॥ २४ ॥ प्रोच्यतेसर्व
शास्त्रेषुसर्वकारणकारणम् ॥ तत्त्वानामादिभूतं चसच्चिदानंदविग्रहम् ॥ २५ ॥ सर्वकर्मघनीभूतमिच्छाज्ञानक्रियाश्रयम् ॥ ह्रींकारमंत्रवाच्यं
तदादितत्त्वंतदुच्यते ॥ २६ ॥

फलदानायोन्मुखरूपस्तस्माच्चहेतोरित्यर्थः ॥ २२ ॥ तत्त्वस्यचतुर्विंशतितत्त्वात्मकस्याऽविवेकाच्चतस्यतत्त्वस्यपृथक्करणार्थमितितात्पर्यम् ॥ सिसृक्षावान्सर्जनेच्छावाञ्जायतइत्यर्थः
यथाबीजमुच्छूनंभवतितथैवपरमात्मापिकालकर्मफलभोगसमयेप्राप्तेजगत्सर्जनेच्छावान्भवतियथाचसुप्तः पुरुषः पूर्वसंस्कारवशेनजागर्ति तद्वत्परमात्मापिप्रलयरूपस्वापावस्था
तोजागर्ति । प्रलयोहिपरमेश्वरस्यस्वापः ॥ अबुद्धिपूर्वइति ॥ साचेयंस्वापाज्जागरणरूपावस्थानबुद्धिकृता॥ तदानींबुद्धेरभावात् ॥ किंतुप्राणिकर्मसंस्कारकृतेति ॥ अयंयःसर्गोजाग
रणरूपस्योत्पत्तिः ॥ सबुद्धिकृतोज्ञेयः संस्कारकृतोज्ञेयइत्यर्थः ॥ २३ ॥ एतत्स्वरूपस्यसर्वोत्तमत्वमाह । एतद्धियदिति ॥ ममम्मुख्यमलौकिकंलोकातीतंरूपमित्यर्थः ॥ तस्यनामांत
राणिवेदोक्तान्याह।अव्याकृतमिति ॥ २४ ॥ २५ ॥ सर्वप्राणिनांकर्माणिघनीभूतानियस्मिन्सर्वकर्मसाक्षीत्यर्थः ॥ इच्छाज्ञानक्रियाश्रयामिति ॥ तथाचश्रुतिःश्वेताश्वतरे॥नतस्यकार्यं
करणंचविद्यतेनतत्समश्चाभ्यधिकश्चदृश्यते ॥ परास्यशक्तिर्विविधैवश्रूयतेस्वाभाविकीज्ञानबलक्रियाचेति ॥ पुराणांतरेपि ॥ इच्छाज्ञानक्रियाचैवरौद्रीब्राह्मीतुवैष्णवी ॥ त्रिधाशक्तिः
स्थितायत्रतत्परंज्योतिरोमिति ॥ ह्रींकारमंत्रस्येदमेवतत्त्वंवाच्यमित्याह ह्रींकारेति ॥ २६ ॥

एवमांदितत्त्वस्यस्वस्यमहिमानमुपवर्ण्यतस्मादादितत्त्वात्ह्रींकारवाच्यादात्मनआकाशःसंभूतइत्यादिक्रमेणाऽपंचीकृतभूतसृष्टिमाह ।तस्मादाकाशइति॥अपंचीकृतआकाशउत्पन्नइत्य
॥ २७ ॥ २८ ॥ २९ ॥ अधुनालिंगदेहोत्पत्तिमाह। तेभ्यइति॥तेभ्यःसूक्ष्मभूतेभ्योमहद्व्यापकंसूत्रमभवत् यत्सूत्रंलिंगमितिपरिचक्षते लिंगशब्देनोच्यतइत्यर्थः॥तेभ्योभूतेभ्योवक्ष्य
णक्रमेणंलिंगदेहउत्पन्नइत्यर्थः ॥३०॥ तत्रसूत्रशब्देनवायुर्गृह्यते॥वायुर्वैसूत्रंवायुनावैसूत्रेणसर्वाणिभूतानिसंदब्धानीतिश्रुतेः॥तत्सूत्रंसर्वात्मकंसर्वप्राणात्मकंभवति ॥ तत्सूत्रंपरमात्म
सूक्ष्मदेहइत्यर्थः ॥ यत्पूर्वमव्यक्तमित्युक्तंतत्परमात्मनःकारणदेहइत्याह ॥ अव्यक्तंकारणोदेहइति ॥ ३१ ॥ यस्मिन्जगद्बीजरूपंस्थितंयस्माच्चलिंगदेहोद्भवस्तदव्यक्तमितिपूर्वे
न्वयः ॥ इत्थंपरमात्मनःसकाशादपंचीकृतभूतोत्पत्तिमुक्त्वामध्येकारणलिंगदेहस्वरूपंसूक्ष्मंसूक्ष्मभूतोत्पत्तिप्रसंगेनोक्त्वाऽथपंचीकृतभूतोत्पत्तिमाह। ततःस्थूलानीति॥ततोपंचीकृतभू
त्पत्त्यनंतरमित्यर्थः ॥ ३२ ॥ पंचीकरणप्रकारमेवाह । पूर्वोक्तानीति ॥ यान्यपंचीकृतभूतानिपूर्वमुक्तानितन्मध्येएकैकंभूतंद्विधाविभजेत्तत्राप्येकैकभूतस्ययोर्धोभागस्तंचतुर्धाविभजे

तस्मादाकाशउत्पन्नःशब्दतन्मात्ररूपकः ॥ भवेत्स्पर्शात्मकोवायुस्तेजोरूपात्मकंपुनः ॥ २७ ॥ जलंरसात्मकंपश्चात्ततोगंधात्मिकाधरा ॥
शब्दैकगुण आकाशोवायुःस्पर्शरवान्वितः ॥ २८ ॥ शब्दस्पर्शरूपगुणंतेजइत्युच्यतेबुधैः ॥ शब्दस्पर्शरूपरसैरापोवेदगुणाःस्मृताः ॥२९॥
शब्दस्पर्शरूपरसगंधैःपंचगुणाधरा॥तेभ्योऽभवन्महत्सूत्रंयल्लिंगंपरिचक्षते॥३०॥सर्वात्मकंतत्संप्रोक्तंसूक्ष्मदेहोऽयमात्मनः॥अव्यक्तंकारणोदेह
सचोक्तःपूर्वमेवहि ॥३१॥ यस्मिञ्जगद्बीजरूपंस्थितंलिंगोद्भवोयतः ॥ ततः स्थूलानिभूतानिपंचीकरणमार्गतः ॥ ३२ ॥ पंचसंख्यानिजायंतेत
त्प्रकारस्त्वथोच्यते ॥ पूर्वोक्तानिचभूतानिप्रत्येकंविभजेद्द्विधा ॥ ३३ ॥ एकैकंभागमेकस्यचतुर्धाविभजेद्गिरे ॥ स्वस्वेतरद्वितीयांशेयोजन
त्पंचपंचते ॥ ३४ ॥ तत्कार्यंचविराड्देहः स्थूलदेहोऽयमात्मनः ॥ पंचभूतस्थसत्त्वांशैःश्रोत्रादीनांसमुद्भवः ॥ ३५॥ ज्ञानेंद्रियाणांराजेंद्रप्रत्ये
कंमिलितैस्तुतैः ॥ अंतःकरणमेकंस्याद्वृत्तिभेदाच्चतुर्विधम् ॥ ३६ ॥ यदातुसंकल्पविकल्पकृत्यंतदाभवेत्तन्मनइत्यभिख्यम् ॥ स्याद्बुद्धि
संज्ञंचयदाप्रवेत्तिसुनिश्चितंसंशयहीनरूपम् ॥३७॥ अनुसंधानरूपंतच्चित्तंचपरिकीर्तितम् ॥ अहंकृत्यात्मवृत्त्यातुतदहंकारतांगतम् ॥ ३८ ॥

विभज्यस्वस्मात्स्वस्मादितरद्यद्भूतंतस्ययोद्वितीयोंशोर्धभागात्मकस्तस्मिन्योजनात्तेसर्वेपंचपदार्थाःपंचावयवाभवंतीत्यर्थः॥३३॥३४॥एवंपंचीकृतभूतानांयत्कार्यंतत्कार्यविराड्देहोभव
त्यर्थः ॥ सविराड्देहःपरमेश्वरस्यस्थूलदेहोभवतीत्याह । स्थूलदेहोयमात्मनइति ॥ आत्मनोममेत्यर्थः ॥ अथेंद्रियांतःकरणप्राणानांपूर्वोक्तलिंगदेहांतर्गतानामुत्पत्तिमाह । पंच
स्थेति ॥ पंचभूतानांयेसत्त्वांशास्तैःप्रत्येकंज्ञानेंद्रियाणिपंचभवंति॥३५॥मिलितैःसत्त्वांशैरंतःकरणंभवतीत्याह । मिलितैरिति॥३६॥वृत्तिभेदस्वरूपमाह । यदात्विति॥संकल्पविकल्प
त्यंयदांतःकरणंकरोतितदातदंतःकरणंमनइत्याभिख्यंमनःसंज्ञकंभवतीत्यर्थः॥यदासंशयहीनंयथास्यात्तथासुनिश्चितंवस्तुतदंतःकरणंप्रवेत्तितदातद्बुद्धिसंज्ञकंभवतीत्यर्थः॥३७॥ यदा
धानवृतिर्भवतितदांतःकरणस्यचित्तमितिसंज्ञेत्यर्थः॥अहंकृत्यात्मवृत्त्येति ॥आत्मशब्दःस्वरूपपरः॥अहंकृतिस्वरूपवृत्त्यातुतदंतःकरणमहंकारतांगतमहंकारसंज्ञांलभतइत्यर्थः ॥ ३८

अथकर्मेंद्रियाणामुत्पत्तिमाह । तेषामिति ॥ तेषांपंचभूतानांप्रत्येकंरजोंशैःकर्मेंद्रियाणिपंचोत्पद्यंते॥तैर्मिलितैस्तुरजोंशैःप्राणापानादिपञ्चवृत्त्यात्मकःप्राणोभवतीत्यर्थः ॥ ३९ ॥ तेषांवा
यूनांवृत्तिभेदात्तेषांस्थानानिनामानिचाह । हृदिप्राणइति ॥४०॥ अधुनापूर्वोक्तलिंगदेहस्ययावत्स्वरूपमुच्यते । ज्ञानेंद्रियाणीति ॥ धियाचसहितंमनइति । मनोबुद्धिश्चेत्यर्थः ॥ ४१ ॥
एतत्सप्तदशावयवकंसूक्ष्मशरीरंमम यल्लिंगसंज्ञकंभवतितादित्याह । एतत्सूक्ष्ममिति॥इत्थंदेहत्रयस्वरूपमुक्त्वाजीवेश्वरविभागकारणमाह ॥ तत्रयाप्रकृतिरिति ॥ तत्रैकाशुद्धसत्त्वाभिधा
नासामायाद्वितीयामलिनसत्त्वप्रधानासाऽविद्येतिमायाविद्ययोर्भेदः ॥४२॥ तत्रयास्वाश्रयंरक्षेन्नावृणुयात्सामायेतिनिगद्यते ॥४३॥ तस्यामिति ॥ तस्यांस्वाश्रयाव्यामोहकारिण्यांशुद्ध
सत्त्वप्रधानायांमायायामीशितुः परमात्मनोयत्प्रतिबिंबंपतातितत्प्रतिबिंबमीश्वरः समाख्यातः॥सचेश्वरः स्वाश्रयंव्यापकंब्रह्मतज्ज्ञानवान्भवति ॥ माययातदाधारब्रह्मणोऽनावरणात्॥
॥४४॥ किंचतस्यव्यापकत्वात्कुत्रापितज्ज्ञानस्यावरणाभावात्ससर्वज्ञोभवति अचिंत्यमायाशक्तिमत्त्वात्सर्वकर्ताचसर्वानुग्रहकर्ताचभवतीत्यर्थः ॥ अविद्यायामिति ॥ मलिनसत्त्वप्रधाना
यामविद्यायांयत्प्रतिबिंबंतज्जीवसंज्ञंभवतीत्युत्तरेणान्वयः ॥ ४५ ॥ तज्जीवसंज्ञंमलिनसत्त्वप्रधानाऽविद्ययातदाश्रयस्यस्वरूपभूतानंदस्यावरणात्सर्वदुःखाश्रयमसर्वज्ञमव्यापकंचभवती

तेषांरजोंशैर्जातानिक्रमात्कर्मेन्द्रियाणिच ॥ प्रत्येकंमिलितैस्तैस्तुप्राणोभवतिपंचधा ॥३९॥ हृदिप्राणोगुदेपानोनाभिस्थस्तुसमानकः ॥ कंठदे
शेप्युदानःस्याद्व्यानःसर्वशरीरगः॥४०॥ ज्ञानेंद्रियाणिपंचैवपंचकर्मेंद्रियाणिच ॥ प्राणादिपञ्चकंचैवधियाचसहितंमनः ॥४१॥ एतत्सूक्ष्मशरी
रंस्यान्ममलिंगंयदुच्यते॥तत्रयाप्रकृतिःप्रोक्तासाराजन्द्विविधास्मृता॥४२॥सत्त्वात्मिकातुमायास्यादविद्यागुणमिश्रिता॥स्वाश्रयंयातुसंरक्षेत्सा
मायेतिनिगद्यते॥४३॥तस्यांयत्प्रतिबिंबंस्याद्बिंबभूतस्यचेशितुः॥ सईश्वरःसमाख्यातःस्वाश्रयज्ञानवान्परः॥४४॥ सर्वज्ञःसर्वकर्ताचसर्वानुग्रह
कारकः॥अविद्यायांतुयत्किंचित्प्रतिबिंबंनगाधिप॥४५॥तदेवजीवसंज्ञंस्यात्सर्वदुःखाश्रयंपुनः ॥ द्वयोरपीहसंप्रोक्तंदेहत्रयमविद्यया॥४६॥देहत्र
याभिमानाच्चाप्यभून्नामत्रयंपुनः॥प्राज्ञस्तुकारणात्मास्यात्सूक्ष्मदेहीतुतैजसः॥४७॥स्थूलदेहीतुविश्वाख्यस्त्रिविधःपरिकीर्तितः॥एवमीशोपिसंप्रो
क्तईशसूत्रविराट्पदैः॥४८॥प्रथमोव्यष्टिरूपस्तुसमष्ट्यात्मापरःस्मृतः॥सहिसर्वेश्वरःसाक्षाज्जीवानुग्रहकाम्यया॥४९॥करोतिविविधंविश्वंनाना
भोगाश्रयंपुनः॥मच्छक्तिप्रेरितोनित्यंमयिराजन्प्रकल्पितः॥५०॥इतिश्रीदेवीभागवतेमहापुराणेसप्तमस्कन्धेदेवीगीतायांद्वात्रिंशोध्यायः॥३२॥

त्यर्थः॥द्वयोरपीति॥द्वयोरपीश्वरजीवयोर्देहत्रयंपूर्वोक्तंभवति॥ईश्वरस्यावरणाभावेपिविक्षेपस्यसत्त्वात् ॥ अत्राऽविद्ययेत्यनेनमायाविद्ययोरुभयोरपिग्रहणम् ॥४६॥ देहत्रयाभिमानेति॥
उभयोरपिदेहत्रयाभिमानान्नामत्रयंभवतीत्यर्थः॥तत्रजीवस्यनामत्रयंवदति । प्राज्ञस्त्विति॥कारणदेहाभिमानीयःसप्राज्ञःसूक्ष्मदेहाभिमानीतुतैजसः ॥ ४७ ॥ स्थूलदेहीति ॥ स्थूलदे
हाभिमानीतुविश्वसंज्ञकइत्यर्थः॥एवमीश्वरोपिदेहत्रयाभिमानादीशसूत्रविराट्पदैःसंप्रोक्तःकथितइत्यर्थः॥४८॥ प्रथमइति ॥ प्रथमोजीवोव्यष्टिरूपोव्यष्टिदेहत्रयाभिमानीत्यर्थः ॥ पर
ईश्वरस्तुसमष्टिदेहाभिमानीत्यर्थः॥ईश्वरस्यमहिमानंवर्णयति । सहिसर्वेश्वरइति॥तस्यस्वानुभवानंदेननिरंतरंनित्यतृप्तत्वेपिकेवलंजीवानुग्रहकाम्ययाजीवानांमोक्षोभवत्वितीच्छयानानावि
धंविश्वंनानाभोगाश्रयंरचयतीतिकरुणासमुद्रईश्वरइत्यर्थः ॥ ४९ ॥ सोपीति ॥ हेराजन्सोपीश्वरोममब्रह्मरूपिण्यायामायाशक्तिस्तयाप्रेरितएवसर्वंकरोति यतःसईश्वरोमयिब्रह्मरूपि
ण्यांरज्जुसर्पवदेवकल्पितस्ततोमच्छक्त्यधीनएवेत्यर्थः ॥५०॥ इतिश्रीदेवीभागवततिलकेसप्तमस्कन्धेदेवीगीतायांद्वात्रिंशोऽध्यायः ॥ ३२ ॥

षट्पंचाशन्महापद्यैरपवादपुरःसरम्॥महाघोरंविश्वरूपंदर्शितंचेतिकथ्यते ॥ १ ॥ इत्थमध्यारोपमुक्त्वापवादमाह । मन्मायेति ॥ हेपर्वत ययामन्मायाशक्त्याचराचरंसर्वंजगत्क्लृ
सापिमायामत्तोमत्स्वरूपात्पृथङ्नास्ति तस्यामयिकल्पितत्वेनमिथ्यात्वात्॥मिथ्यापदार्थस्यचाऽधिष्ठानसत्तातिरिक्तसत्ताभावात् ॥ तस्मादहमेवाऽस्मिपरमार्थतोनान्यत्किंचिद्वस्त्वंत
मस्तीत्यर्थः ॥१ ॥ ननुसर्वथाद्वैताभावेजगत्कथंभासतेइतिचेत्तत्राह ॥ व्यवहारेति ॥ अनाद्यविद्याभ्रांतानांयोव्यवहारस्तद्दृशातद्दृष्ट्यामायाविद्येतिविश्रुताभवति ॥ तत्त्वदृष्ट्यातुब्रह
दृष्ट्यातुसानैवास्ति किंतुतत्त्वमेवकेवलमस्तीत्यर्थः॥नहिभ्रांतदृष्ट्यारज्जुसर्पवत् कारणाज्ञानसत्त्वेपिरज्जुदृष्ट्याकिंचिदपितद्वर्तत इतिभावः॥तथाचश्रुतिः ॥ ननिरोधोनचोत्पत्तिर्नबद्ध
नचसाधकः॥नमुमुक्षुर्नवैमुक्तइत्येषापरमार्थतेति ॥ तापनीयेच असत्त्वमरजस्कमतमस्कममायमितिब्रह्मवर्णितम् ॥ २ ॥ ननुयदिप्रपंचोमिथ्यातर्हितदंतःपातीजीवोपिमिथ्येतिवक्त
व्यम् ॥ तथाचजीवस्यमिथ्यात्वेमोक्षदशायांतस्यावस्थानाभावेनस्वनाशार्थंकदापिजीवोनयत्नंकुर्यादितिमोक्षशास्त्रंव्यर्थमेवेति चेत्तत्राह । साहमिति ॥ हेगिरेमायाचाविद्याकर्माणितत
त्प्राणिनाम् आदिनानानासंस्काराश्चतैःसहिताऽहमेवकूटस्थब्रह्मरूपासर्वंजगत्प्रथमतःसृष्ट्वातदंतस्तन्मध्येघटेआकाशवदादर्शेप्रतिबिंबवद्वाचिदाभासरूपेणप्रविशामि ॥ तत्रापिप्राणपुर
सराप्राणमग्रतःकृत्वाप्रविशामि ॥ ३ ॥ किमर्थमितिचेत्तत्राह । लोकांतरगतिरिति ॥ यद्यहंप्राणंपुरःसरंकृत्वाप्राणाभिमानंकृत्वानप्रेक्ष्यामितर्हिममव्यापकत्वाल्लोकांतरगमनादिकंज

देव्युवाच॥मन्मायाशक्तिसंक्लृप्तंजगत्सर्वंचराचरम्॥सापिमत्तःपृथङ्मायानास्त्येवपरमार्थतः॥ १ ॥व्यवहारदृशासेयंविद्यामायेतिविश्रुता ॥ त
त्त्वदृष्ट्यातुनास्त्येवतत्त्वमेवास्तिकेवलम्॥२॥साऽहंसर्वंजगत्सृष्ट्वातदंतःप्रविशाम्यहम्॥मायाकर्मादिसहितागिरेप्राणपुरःसरा॥३॥लोकांतरग
तिर्नोचेत्कथंस्यादितिहेतुना॥यथायथाभवंत्येवमायाभेदास्तथातथा॥४॥उपाधिभेदाद्भिन्नाऽहंघटाकाशादयोयथा॥उच्चनीचादिवस्तूनिभास
यन्भास्करःसदा ॥५॥ नदुष्यतितथैवाऽहंदोषैर्लिप्ताकदापिन ॥ मयिबुद्ध्यादिकर्तृत्वमध्यस्यैवापरेजनाः ॥ ६ ॥

नमरणादिव्यवहारश्चकथंस्यात्॥नहिव्यापकस्यगमनागमनंदेहसंबंधोदेहत्यागश्चसंभवति ॥ इतिहेतुनातद्धेत्वर्थंप्राणपुरःसरंप्रविशामि ॥ तस्मिंश्चप्राणेस्वीकृतेसतितस्यदेहांतरप्रवे
जन्मतत्त्यागेमरणंतथैवलोकांतरगतिश्चेतिसर्वंसिध्यतीति ॥ अयंभावः ॥ नकेवलंजीवत्वंचिदाभासस्यैव येनपूर्वोक्तंदूषणंभवेत् ॥ किंतर्हिअहंकूटस्थरूपिणीतथांतःकरणंतदाश्रयभूत
विद्याचिभासश्चेतिचतुष्टयंमिलित्वाजीवत्वम्.॥यथाचज्ञानेनविद्यातःकरणचिदाभासानांनाशेपिकूटस्थब्रह्मांशस्यमुक्तावशेषान्नजीवस्यमोक्षार्थंमप्रवृत्तिर्नवामोक्षशास्त्रानर्थक्यामीति
ननुतर्हितवैकत्वाज्जीवस्याप्येकत्वंस्यादितिचेत्तत्राह । यथायथेति ॥ ननुतर्हियथाव्यापकएकएवाकाशोघटाद्युपाधिभेदेनयथाभिद्यते तथाविधानेकत्वस्वीकारेणाऽविद्यानामतःकरणा
चभेदात्कूटस्थोपिभिद्यतइतिजीवबहुत्वमप्युपपन्नमेवेत्यर्थः ॥ तथाचश्रुतिः इंद्रोमायाभिःपुरुरूपईयतेयुक्ताह्यस्यहरयःशतादशेति ॥ ४ ॥ तवजगदंतःपातित्वेनतद्दोषेणदुष्टत्वमपिस्या
त्तत्राह । उच्चनीचादिवस्तुनीति॥यथासूर्यःसर्वाण्युच्चनीचादिवस्तूनिभासयन्नपिनदुष्यतिं तथैवाऽहंकदापिदोषैर्दुष्टानास्मीत्यर्थः ॥ ५ ॥ ननुसूर्यःसाक्षिभूतोनदुष्यतीतियुक्तम् ॥ त्वं
सकलकार्यकर्त्रीतिकर्तुर्दोषलेपोभविष्यत्येवेतिचेत्तत्राह ॥ मयिबुद्ध्यादीति ॥ विमूढाबुद्ध्यादिनिष्ठंकर्तृत्वमाविवेकेनमय्यात्मन्यध्यस्यात्माकर्तेतिवदन्तिनसुबुद्धयोविवेकिनः ॥ तथा
सूर्यवदहमपिसाक्षिण्येवनकर्त्रीतिभावः ॥ ६ ॥

अज्ञानभेदतइति ॥ जीवबहुत्ववदीश्वरमूर्तिबहुत्वमपिमायायाभेदान्मायाकल्पितब्रह्मविष्ण्वाद्याकारभेदाद्भवतीतिजीवेश्वरसिद्धिमुपसंहरति । जीवेश्वरविभागश्चेति ॥ अज्ञानभेदाज्जीवसिद्धिर्मायाभेदादीश्वरसिद्धिरित्यर्थः ॥ ७ ॥ तत्रदृष्टांतमाह । घटाकाशेति ॥ ८ ॥ ईश्वरबहुत्वंब्रह्मविष्ण्वादिरूपेश्वरबहुत्वमित्यर्थः ॥९॥ जीवभेदहेतुंविशदयति । देहेंद्रियादीति॥ ॥ १० ॥ हेधराधरपर्वत । गुणानांयेवासनाभेदाःसात्त्विकाराजसास्तामसाश्चतैर्भेदितायामायासापरभेदस्यब्रह्मविष्ण्वादीश्वरभेदस्यहेतुर्नान्याइत्यर्थः॥इदंमूतसंहितांतर्गतसूतगीतायांस्पष्टम् व्याख्यातंचतत्रमाधवाचार्यैः ॥ ११ ॥ यतएकमेवचैतन्यंसर्वात्मकंततोऽहंसर्वात्मिकास्मीत्याह । मयीति ॥ ओतंप्रोतंग्रथितमित्यर्थः ॥ १२ ॥ ईश्वरःकारणदेहाभिमानी ॥

वदंतिचाऽऽत्माकमेंतिविमूढानसुबुद्धयः ॥ अज्ञानभेदतस्तद्वन्मायायाभेदतस्तथा ॥ ७ ॥ जीवेश्वरविभागश्चकल्पितोमाययैवतु ॥ घटाकाशमहाकाशविभागःकल्पितोयथा ॥८॥ तथैवकल्पितोभेदोजीवात्मपरमात्मनोः ॥ यथाजीवबहुत्वंचमाययैवनचस्वतः ॥ ९ ॥ तथेश्वरबहुत्वंचमाययानस्वभावतः ॥ देहेंद्रियादिसंघातवासनाभेदभेदिता ॥ १० ॥ अविद्याजीवभेदस्यहेतुर्नान्यःप्रकीर्तितः ॥ गुणानांवासनाभेदभेदितायाधराधर ॥ ११ ॥ मायासापरभेदस्यहेतुर्नान्यःकदाचन ॥ मयिसर्वमिदंप्रोतमोतंचधरणीधर ॥ १२ ॥ ईश्वरोऽहंचसूत्रात्माविराडात्माऽहमस्मिच ॥ ब्रह्माऽहंविष्णुरुद्रौचगौरीब्राह्मीचवैष्णवी ॥ १३ ॥ सूर्योऽहंतारकाश्चाऽहंतारकेशस्तथाऽस्म्यहम् ॥ पशुपक्षिस्वरूपाऽहंचांडालोऽहंचतस्करः ॥ १४ ॥ व्याधोऽहंक्रूरकर्माऽहंसत्कर्माऽहंमहाजनः ॥ स्त्रीपुन्नपुंसकाकारोऽप्यहमेवनसंशयः ॥ १५ ॥ यच्चकिंचित्क्वचिद्वस्तुदृश्यतेश्रूयतेऽपिवा ॥ अंतर्बहिश्चतत्सर्वंव्याप्याऽहंसर्वदास्थिता ॥ १६ ॥ नतदस्तिमयात्यक्तंवस्तुकिंचिच्चराचरम् ॥ यद्यस्तिचेत्तच्छून्यंस्याद्वंध्यापुत्रोपमंहितत् ॥ १७ ॥ रज्जुर्यथासर्पमालाभेदैरेकाविभातिहि ॥ तथैवेशादिरूपेणभाम्यहंनात्रसंशयः ॥१८॥ अधिष्ठानातिरेकेणकल्पितंतन्नभासते ॥ तस्मान्मत्सत्तयैवैतत्सत्तावन्नान्यथाभवेत् ॥ १९ ॥ हिमालय उवाच ॥ यथावदसिदेवेशिसमष्ट्यात्मवपुस्त्विदम् ॥ तथैवद्रष्टुमिच्छामियदिदेविकृपामयि ॥ २० ॥ व्यासउवाच ॥ इतितस्यवचःश्रुत्वासर्वेदेवाःसविष्णवः ॥ ननंदुर्मुदितात्मानःपूजयंतश्चतद्वचः ॥ २१ ॥ अथदेवमतंज्ञात्वाभक्तकामदुघाशिवा ॥ अदर्शयन्निजंरूपंभक्तकामप्रपूरिणी ॥ २२ ॥ अपश्यंस्तेमहादेव्याविराड्रूपंपरात्परम् ॥ द्यौर्मस्तकंभवेद्यस्यचंद्रसूर्यौचचक्षुषी ॥ २३ ॥ दिशःश्रोत्रेवचोवेदाःप्राणोवायुःप्रकीर्तितः ॥ विश्वंहृदयमित्याहुःपृथिवीजघनंस्मृतम् ॥ २४ ॥

लिंगदेहाभिमानीसूत्रात्माहिरण्यगर्भः ॥ विराट्स्थूलदेहाभिमानी ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ शून्यंस्यादिति ॥ मयासद्रूपयात्यक्तंशून्यमसदेवस्यादित्यर्थः ॥ १७ ॥ १८ ॥ अधिष्ठानातिरेकेणेति ॥ अधिष्ठानसत्तातिरेकेणेत्यर्थः ॥ यतएतत्कल्पितंजगत्तस्मान्मत्सत्तयैवसत्तावद्भवेन्नान्यथेत्यर्थः ॥ १९ ॥ समष्ट्यात्मेति ॥ सर्वाभिमानीविराट्स्वरूपंयथावदसीत्यर्थः ॥ २० ॥ पूजयंश्चेति ॥ सर्वेषांभगवतीविराट्स्वरूपदर्शनोत्सुकत्वात्स्वाभीष्टसंपादनेप्रवृत्तस्यहिमालयस्यतद्वचःसाधुसाध्वितिपूजयंतइत्यर्थः ॥ २१ ॥ २२ ॥ द्यौर्मस्तकमिति ॥ अत्रद्यौःशब्देनसर्वोर्ध्वःसत्यलोकोगृह्यते ॥ २३ ॥ वायुरेवैतस्यप्राणाविश्वंसर्वात्मकमव्यक्तमित्यर्थः ॥ तदस्यरूपस्यहृदयम् ॥ २४ ॥

नभस्तलंभुवर्लोकः ॥ २५ ॥ सत्यलोकादधःस्थितस्तपोलोकोरराटिर्ललाटमित्यर्थः ॥ शब्दःश्रोत्रमिति ॥ योऽस्माकंश्रोत्रविषयःशब्दःसतस्यरूपस्यश्रोत्रंश्रोत्रेंद्रियंभवतीत्यर्थः॥
दिशःश्रोत्रेइत्यत्रतुश्रोत्रशब्देनश्रोत्रेंद्रियाधारोगृह्यतइतिनपुनरुक्तिः ॥२६॥ नासत्यदस्रौअश्विनीकुमारौतावस्यरूपस्यनासेनासापुटेस्तः ॥ गंधस्तुघ्राणंघ्राणेंद्रियमित्यर्थः ॥ २७ ॥ ब्र
स्थानंप्रजापतिचतुर्मुखस्थानंतदस्यभ्रूविजृंभोभ्रूविकासः ॥ आपोजलानितुतालुःरसनेंद्रियाधारोभवति ॥ तद्गतोरसस्तुजिह्वाभवति ॥ रसनेंद्रियंभवतीत्यर्थः ॥२८॥ स्नेहकलाः स्त्री
त्रादिस्नेहलेशाः ॥ सर्गःसृष्टिरेवाऽपांगमोक्षःकटाक्षइत्यर्थः ॥ २९ ॥ अधर्ममार्गस्तुपृष्ठभागइत्यर्थः ॥ ३० ॥ महेशितुर्महेश्वर्यादेव्यागिरयःपर्वताअस्थीनीत्यर्थः ॥ ३१ ॥ कौमारी
त्रिविधंवयोगतिरित्यर्थः ॥३२॥ चंद्रमास्त्विति । तुशब्दोमनइत्यत्रयोज्यः॥ हेराजन्जनमेजय श्रीजगदंबायाश्चंद्रोमनोपिस्मृतइत्यर्थः॥ तेनपूर्वोक्तनेत्रमध्येगणितस्यचंद्रमसोमनस्त्व

नभस्तलंनाभिसरोज्योतिश्चक्रमुरःस्थलम् ॥ महर्लोकस्तुग्रीवास्याज्जनोलोकोमुखंस्मृतम् ॥२५॥ तपोलोकोरराटिस्तुसत्यलोकादधःस्थितः॥
इंद्रादयोबाहवःस्युःशब्दःश्रोत्रंमहेशितुः ॥ २६ ॥ नासत्यदस्रौनासेस्तोगंधोघ्राणंस्मृतोबुधैः ॥ मुखमग्निःसमाख्यातोदिवारात्रीचपक्ष्मणी ॥
॥ २७ ॥ ब्रह्मस्थानंभ्रूविजृंभोऽप्यापस्तालुःप्रकीर्तिताः ॥ रसोजिह्वासमाख्यातायमोदंष्ट्राःप्रकीर्तिताः ॥ २८ ॥ दंताःस्नेहकलायस्यहासोमा
याप्रकीर्तिता ॥ सर्गस्त्वपांगमोक्षःस्याद्व्रीडोर्ध्वोष्ठोमहेशितुः ॥ २९ ॥ लोभःस्यादधरोष्ठोऽस्याधर्ममार्गस्तुपृष्ठभूः ॥ प्रजापतिश्चमेढ्रंस्याद्यः
स्रष्टाजगतीतले ॥ ३० ॥ कुक्षिःसमुद्रागिरयोऽस्थीनिदेव्यामहेशितुः ॥ नद्योनाड्यःसमाख्यातावृक्षाःकेशाःप्रकीर्तिताः ॥ ३१ ॥ कौमारयौ
वनजरावयोऽस्यगतिरुत्तमा ॥ बलाहकास्तुकेशाःस्युःसंध्येतेवाससीविभोः ॥ ३२ ॥ राजञ्छ्रीजगदंबायाश्चंद्रमास्तुमनःस्मृतः ॥ विज्ञानश
क्तिस्तुहरीरुद्रोंतःकरणंस्मृतम् ॥ ३३ ॥ अश्वाहिजातयःसर्वाःश्रोणिदेशेस्थिताविभोः ॥ अतलादिमहालोकाःकट्यधोभागतांगताः॥ ३४ ॥
एतादृशंमहारूपंददृशुःसुरपुंगवाः ॥ ज्वालामालासहस्राढ्यंलेलिहानंचजिह्वया ॥ ३५ ॥ दंष्ट्राकटकटारावंवमंतंवह्निमक्षिभिः ॥ नानायुधधरं
वीरंब्रह्मक्षत्रौदनंचयत्॥ ३६ ॥ सहस्रशीर्षनयनंसहस्रचरणंतथा ॥ कोटिसूर्यप्रतीकाशंविद्युत्कोटिसमप्रभम् ॥ ३७ ॥ भयंकरंमहाघोरंहृदक्ष्णो
स्त्रासकारकम् ॥ ददृशुस्तेसुराःसर्वेहाहाकारंचचक्रिरे॥३८॥विकंपमानहृदयामूर्च्छामापुर्दुरत्ययाम्॥स्मरणंचगतंतेषांजगदंबेयमित्यपि॥३९॥

पिबोधितमितिबोध्यम् ॥ विज्ञानशक्तिर्बुद्धिःसाहरिः ॥ ३३ ॥ अतलादीति ॥ अतलादिपातालांतालोकायथायोग्यंकट्यधोभागतांगताः ॥ कटिमारभ्यपादमूलपर्यंतंव्यवस्थि
इत्यर्थः ॥ तथाचश्रुतिः अग्निर्मूर्धाचक्षुषीचंद्रसूर्यौदिशःश्रोत्रेवाग्विवृताश्चवेदाः ॥ वायुःप्राणोहृदयंविश्वमस्यपद्भ्यांपृथिवीह्येषसर्वभूतांतरात्मेति ॥ ३४ ॥ जिह्वयासर्वंजगल्लेलिह
स्वादयंतम् ॥ ३५ ॥ दंष्ट्रासुकटकटारावःकटकटेतिशब्दोयस्य ब्रह्मक्षत्त्रेओदनोयस्य ॥ यस्यब्रह्मक्षत्त्रंचोभेभवतओदनोमृत्युर्यस्योपसेचनमितिश्रुतेः ॥ ३६ ॥ ३७ ॥ हाहाकारंभ
नभीतत्वाच्चाक्रिरेइत्यर्थः ॥ ३८ ॥ स्मरणंचगतमिति ॥ इयंजगदंबाऽस्माकंपालयित्रीतिस्मरणमपितेषांगतंनष्टमित्यर्थः ॥ ३९ ॥

अथतइति ॥ विभोर्देव्याश्चतुर्दिक्षुयेमूर्तिमंतोवेदाःस्थितास्तेमूर्च्छितान्देवान्मूर्च्छातोबोधयामासुर्व्युत्थापयामासुरित्यर्थः ॥ ४० ॥ ४१ ॥ ४२ ॥ सभयाजाताःस्मइत्यर्थः ॥ ४३ ॥ स्वस्याप्यज्ञेयइति ॥ यावान्यत्परिमाणवान्यश्चयादृशस्तवस्वपराक्रमःसतवस्वस्याप्यज्ञेयएवैतादृशोसौतवपराक्रमोऽस्माकंतदर्वाक्जायमानानांकथंसविषयोभवेन्नकथमपीत्यर्थः ॥ तथाच श्रुतिः अर्वाग्देवाअस्यविसर्जनेनाथाःकोवेदयतआबभूवेति ॥ योअस्याध्यक्षःपरमेव्योमन्सोअंगवेदयतिवानवेदेति ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ यस्मात्संभूतोविधिरितिकर्तव्यतारूपस्तस्मैनमइत्यन्वयः ॥ ४८ ॥ ससप्तप्राणार्चिषइति ॥ प्राणाश्चार्चिषश्चेतिद्वंद्वः ॥ सप्तशीर्षण्याःप्राणास्तस्मादेवभवंतीत्यर्थः ॥ तेषांचसप्तार्चिषोदीप्तयःस्वस्वविषयावद्योतनानि ॥ तथासप्तसमिधः ॥ सप्तविषयाविषयैर्हिप्राणाः सामिध्यंते॥सप्तहोमास्तद्विषयविज्ञानानि ॥ यदस्यविज्ञानंतज्जुहोतीतिश्रुत्यंतरात् ॥ तथासप्तलोकाइंद्रियस्थानानि ॥ एतेयस्माज्जातास्तस्मैसर्वात्मनेनमः ॥ तथाचश्रुतिर्मुंडके ॥ यस्मादग्निःसमिधोयस्यसूर्यः ॥ सोमात्पर्जन्यओषधयःप्रजानामित्यादि तस्मादृचःसामयजूंषिदीक्षायज्ञाश्चसर्वेक्रतवोदक्षिणाश्चसंवत्सरोयजमानश्चलोकाःसोमोयत्रपवतेयत्रसूर्यइति ॥ ४९ ॥ ५०॥ ५१ ॥ ५२ ॥ ५३॥५४॥५५॥५६॥ इतिश्रीदेवीभागवतटीलकेसप्तमस्कंधेदेवीगीतायांत्रयस्त्रिंशोऽध्यायः॥३३॥

अथतेयेस्थितावेदाश्चतुर्दिक्षुमहाविभोः॥बोधयामासुरत्युग्रंमूर्छातोमूर्च्छितान्सुरान्॥४०॥अथतेधैर्यमालंब्यलब्ध्वाचश्रुतिमुत्तमाम् ॥ प्रेमाश्रुपूर्णनयनारुद्धकंठास्तुनिर्जराः॥४१॥बाष्पगद्गदयावाचास्तोतुंसमुपचक्रिरे॥देवाऊचुः॥अपराधंक्षमस्वांबपाहिदीनांस्त्वदुद्भवान्॥४२॥कोपंसंहरदेवेशिसभयारूपदर्शनात्॥कातेस्तुतिःप्रकर्तव्यापामरैर्निर्जरैरिह॥४३॥स्वस्याप्यज्ञेयएवाऽसौयावान्यश्चस्वविक्रमः॥ तदर्वाग्जायमानानांकथंसविषयोभवेत्॥४४॥नमस्तेभुवनेशानिनमस्तेप्रणवात्मिके॥सर्ववेदान्तसंसिद्धेनमोह्रींकारमूर्तये॥४५॥यस्मादग्निःसमुत्पन्नोयस्मात्सूर्यश्चचंद्रमाः॥यस्मादोषधयःसर्वास्तस्मैसर्वात्मनेनमः॥४६॥यस्माच्चदेवाःसंभूताःसाध्याःपक्षिणएवच॥पशवश्चमनुष्याश्चतस्मैसर्वात्मनेनमः॥४७॥प्राणापानौव्रीहियवौतपःश्रद्धाऋतंतथा॥ब्रह्मचर्यंविधिश्चैवयस्मात्तस्मैनमोनमः॥४८॥ सप्तप्राणार्चिषोयस्मात्समिधःसप्तएवच ॥ होमाःसप्ततथालोकास्तस्मैसर्वात्मनेनमः॥४९॥यस्मात्समुद्रागिरयःसिंधवःप्रचरंतिच॥यस्मादोषधयःसर्वारसास्तस्मैनमोनमः॥५०॥ यस्माद्यज्ञःसमुद्भूतोदीक्षायूपश्चदक्षिणाः॥ऋचोयजूंषिसामानितस्मैसर्वात्मनेनमः॥५१॥नमःपुरुस्तात्पृष्ठेचनमस्तेपार्श्वयोर्द्वयोः॥ अधऊर्ध्वंचतुर्दिक्षुमातर्भूयोनमोनमः॥५२॥उपसंहरदेवेशिरूपमेतदलौकिकम्॥तदेवदर्शयाऽस्माकंरूपंसुंदरसुन्दरम् ॥५३॥ व्यासउवाच॥इतिभीतान्सुरान्दृष्ट्वाजगदंबाकृपार्णवा॥संहृत्यरूपंघोरंतद्दर्शयामाससुंदरम्॥५४॥पाशांकुशवराभीतिधरंसर्वांगकोमलम्॥ करुणापूर्णनयनंमंदस्मितमुखांबुजम्॥५५॥दृष्ट्वातत्सुंदरंरूपंतदाभीतिविवर्जिताः॥शांतचित्ताःप्रणेमुस्तेहर्षगद्गदनिःस्वनाः॥५६॥इतिश्रीदेवी॰महापुराणेसप्तमस्कंधेदेवीगीतायांत्रयस्त्रिंशोध्यायः ३३॥

पंचाशत्पद्यवर्यैस्तुवैराग्यकथनोत्तरम् ॥ ज्ञानमेवतुसंपाद्यंमोक्षार्थमितिकथ्यते ॥ १ ॥ दर्शितंविश्वरूपमनायासेनलब्धमस्माभिरितिसहजमस्तीतिनमंतव्यमितिदेवान्प्रतिभगवतीप्राह
क्वयूयमिति ॥ १ ॥ २ ॥ प्रकृतमिति ॥ ब्रह्मविद्योपदेशप्रकरणंहिप्रचालितं पूर्वमध्येदेवैर्विश्वरूपदर्शनार्थंप्रार्थितासतीविश्वरूपंदर्शयामास ॥ उपसंहृतेतुविश्वरूपेपुनःप्रकृतंयदुपदे
प्रकरणंतच्छृण्विति हिमालयंप्रतिभगवतीवदतीतिबोध्यम् ॥ परमात्मात्रजीवतामिति॥अमूढोमूढइवव्यवहरन्नास्तेमाययैवेतिश्रुतेरित्यर्थः॥३॥ वैराग्यार्थमाह । क्रियाःकरोतीति ॥४
तत्संस्कृतिःसुखदुःखसंस्कारः ॥५॥ एतस्येति ॥ एतस्यजन्ममरणप्रबंधरूपस्यसंसारस्यविरामःसमाप्तिःकदापिनास्ति ॥ अद्यपर्यंतमनंतसृष्टिप्रलयेषुजातेष्वपिजीवसंसारस्यविद्यमा
त्वात् ॥ इत्थंसंसारस्याऽनादिकालप्रवृत्तत्वमुपपाद्यतन्नाशोपायप्रदर्शनार्थंतन्निदानमाह ॥ अज्ञानमेवेति ॥ ततःकामोऽविद्यातइच्छेत्यर्थः । इच्छातःक्रियाभवतीत्यर्थः ॥ ६ ॥ यस्म
दज्ञानमेवमूलंतस्मादित्यर्थः ॥ एतद्द्विजन्मेति ॥ तथाचश्रुतिः ॥ योह्यविदित्वात्मानमस्माल्लोकात्प्रैतिसकृपणइति ॥७॥ अज्ञाननाशनसाधनमाह ॥ विद्यैवेति॥८॥ तज्जन्मज्ञानजंक
नपटीयइत्यर्थः ॥ तत्रहेतुमाह । विरोधाभावतइति ॥ नह्यंधकारोंधकारंनाशयति तद्वदज्ञानजन्यकर्मणोप्यज्ञानरूपत्वान्नतेनाऽज्ञानेनकर्मणाविरोधइत्यर्थः । कर्मणाज्ञाननाशेआशानै

श्रीदेव्युवाच॥क्वयूयंमंदभाग्यावैक्वेदंरूपंमहाद्भुतम्॥तथापिभक्तवात्सल्यादीदृशंदर्शितंमया॥१॥ नवेदाध्ययनैर्योगैर्नदानैस्तपसेज्यया॥रूपंद्रष्टु
मिदंशक्यंकेवलंमत्कृपांविना॥२॥प्रकृतंशृणुराजेंद्रपरमात्माऽत्रजीवताम्॥उपाधियोगात्संप्राप्तःकर्तृत्वादिकमप्युत॥३॥ क्रियाःकरोतिविविधा
धर्माधर्मैकहेतवः॥नानायोनीस्ततःप्राप्यसुखदुःखैश्चयुज्यते ॥४॥ पुनस्तत्संस्कृतिवशान्नानाकर्मरतःसदा॥नानादेहान्समाप्नोतिसुखदुःखैश्चयु
ज्यते ॥ ५ ॥ घटीयंत्रवदेतस्यनविरामःकदापिहि ॥ अज्ञानमेवमूलंस्यात्ततः कामःक्रियास्ततः ॥ ६ ॥ तस्मादज्ञाननाशायतेतनियतंन
रः ॥ एतद्द्विजन्मसाफल्यंयदज्ञानस्यनाशनम् ॥ ७ ॥ पुरुषार्थसमाप्तिश्चजीवन्मुक्तदशापिच ॥ अज्ञाननाशनेशक्ताविद्यैवतुपटीयसी ॥ ८ ॥
नकर्मतज्जन्नोपास्तिर्विरोधाभावतोगिरे ॥ प्रत्युताशाज्ञाननाशेकर्मणानैवभाव्यताम्॥९॥ अनर्थदानिकर्माणिपुनःपुनरुशंतिहि ॥ ततोरागस्त
तोदोषस्ततोनर्थोमहान्भवेत् ॥ १० ॥ तस्मात्सर्वप्रयत्नेनज्ञानंसंपादयेन्नरः ॥ कुर्वन्नेवेहकर्माणीत्यतःकर्माप्यवश्यकम् ॥ ११ ॥ ज्ञानादेवहि
कैवल्यमतःस्यात्तत्समुच्चयः ॥ सहायतांव्रजेत्कर्मज्ञानस्यहितकारिच ॥१२॥ इतिकेचिद्वदंत्यत्रतद्विरोधान्नसंभवेत् ॥ ज्ञानाद्धृद्ग्रंथिभेदःस्याद्धृ
द्ग्रंथौकर्मसंभवः ॥ १३ ॥

भाव्यतांनैवकर्तव्येत्यर्थः ॥ ९ ॥ कर्मणिदोषंवदति । अनर्थदानीति ॥ १० ॥ अत्रसमुच्चयवादिमतमुत्थापयति॥कुर्वन्नेवेहेति ॥ कुर्वन्नेवेहकर्माणिजिजीविषेच्छतंसमाइतिश्रुत्याया
ज्जीवंकर्मविहितम् ॥ ज्ञानादेवहिकैवल्यमितिश्रुत्याज्ञानमपिसंपाद्यत्वेनोक्तं तत्रयावज्जीवश्रुतेः संकोचेप्रमाणाभावाज्ज्ञानंकर्मचसमुच्चयेनयावज्जीवंपुरुषेणाश्रयणीयमित्यर्थः ॥ ११
नन्वज्ञाननाशेज्ञानस्यैवोपयोगात्कर्मकिंकरिष्यतीतिचेत्तत्राह । सहायतामिति ॥ ज्ञानस्यसहायंभविष्यतिकर्मेत्यर्थः ॥ १२ ॥ तस्माद्यावज्जीवंकर्मज्ञानंचाऽऽश्रयणीयमितिमतंकेचिद
रित्याह । इतिकेचिदिति ॥ तत्खंडयति । तद्विरोधादिति॥ यदिज्ञानोत्तरंकर्मसंभवेत्तदाज्ञानकर्मणोःसमुच्चयोवक्तव्यः॥ सतुनैवसंभवति॥तस्माद्यावज्जीवश्रुतेःसंकोचोज्ञानेनसहावस्
नविरोधाद्गलेपातितइत्यर्थः ॥ ननुकिमितिकर्मणोज्ञानेनसहावस्थानंसंभवतितत्राह । ज्ञानाद्धृद्ग्रंथीति॥ हृदयस्यग्रंथिरंतःकरणात्मदेहतादात्म्यरूपः ॥ तस्याज्ञानेनात्मसाक्षात्कारेणभे
नाशःस्यात्तस्मिंश्चहृद्ग्रंथौमनुष्योऽहंब्राह्मणोहंपरलोकेच्छावानहमित्यादिरूपेसत्येवकर्मसंभवः तादृशमधिकारिणमुद्दिश्यैवकर्मविधानात्॥तस्मात्तयोर्नैकत्रावस्थानंसंभवतीत्यर्थः ॥१३

तदेवदृष्टांतपुरःसरंस्पष्टयति यौगपद्यमिति ॥ ततस्तस्माद्धतोस्तयोर्ज्ञानकर्मणोस्तमःप्रकाशयोरिवविरोधाद्यौगपद्यंनसंभवतीतियावज्जीवश्रुतिरज्ञानिविषयिकैवेतिभावः ॥ १४ ॥ तर्हि कियत्पर्यंतंवैदिककर्ममर्यादेतिचेत्तत्राह । तस्मात्सर्वाणीति ॥ यथाज्ञानेनसहविरोधाद्यावज्जीवश्रुतेःसंकोचस्तथाज्ञानांगेनसहाऽपिविरोधात्तस्याःश्रुतेर्यावद्वैराग्यादिप्राप्तिपर्यंतमितिसं कोचः कर्तव्यः ॥ तथाचचित्तशुद्ध्यंतमेवकर्माणि हे महामते सिद्धानि तानिप्रयत्नतोऽतियत्नेनश्रद्धादिपुरःसरंचित्तशुद्धिपर्यंतंकुर्यादित्यर्थः ॥ १५॥ तस्यैवमर्यादामाह । शमइति ॥ शमोंतरिंद्रियनिग्रहः ॥ दमोबाह्येंद्रियनिग्रहः ॥ तितिक्षाशीतोष्णादिसहिष्णुत्वम् ॥ वैराग्यमिहामुत्रफलभोगविरागः ॥ सत्त्वसंभवोंतःकरणगतसत्त्वस्यशुद्धिः ॥ एतत्सिद्धिपर्यंतमे वकर्माणिनततःपरमित्यर्थः ॥ १६ ॥ तदंतेकर्मत्यागस्तुसंन्यासेनैवकर्तव्योनान्यथेत्याह । तदंतेचैवेति ॥ संन्यस्यसंन्यासाश्रमंगृहीत्वेत्यर्थः ॥ विधिनासंपादितकर्मणोविधिनैवत्याग स्ययुक्तत्वादितिभावः॥संन्यस्यश्रवणंकुर्यादितिवाक्यात्संन्यासोत्तरंश्रवणार्थंगुरुमाश्रयेत् ॥ आत्मवान्स्वाधीनांतःकरणइत्यर्थः॥ श्रोत्रियमधीतवेदवेदार्थम्॥ब्रह्मनिष्ठंब्रह्मानुभविनम् ॥ निर्व्याजयानिष्कपटयाभक्त्या ॥ तथाचश्रुतिः ॥ यस्यदेवेपराभक्तिर्यथादेवेतथागुरौ ॥ तस्यैतेकथिताह्यर्थाःप्रकाशंतेमहात्मनइति ॥ १७ ॥ गुरुमाश्रित्यवेदांतश्रवणंनित्यमतंद्रितो नामालस्यादिदोषशून्यःकुर्यादित्याह । वेदांतश्रवणमिति ॥ १८ ॥ किंतद्वाक्यविचारेणफलंभवतितत्राह । तत्त्वमस्यादीतिं ॥ मद्रूपोहीति ॥ब्रह्मविद्ब्रह्मैवभवतीतिश्रुतेरित्यर्थः॥ १९॥

यौगपद्यंनसंभाव्यंविरोधात्तुततस्तयोः ॥ तमःप्रकाशयोर्यद्वद्यौगपद्यंनसंभवि ॥ १४ ॥ तस्मात्सर्वाणिकर्माणिवैदिकानिमहामते ॥ चित्तशु द्ध्यंतमेवस्युस्तानिकुर्यात्प्रयत्नतः ॥ १५ ॥ शमोदमस्तितिक्षाचवैराग्यंसत्त्वसंभवः॥ तावत्पर्यंतमेवस्युःकर्माणिनततःपरम् ॥ १६ ॥ तदंतेचै वसंन्यस्यसंश्रयेद्गुरुमात्मवान् ॥ श्रोत्रियंब्रह्मनिष्ठंचभक्त्यानिर्व्याजयापुनः ॥ १७ ॥ वेदांतश्रवणंकुर्यान्नित्यमेवमतंद्रितः ॥ तत्त्वमस्यादिवा क्यस्यनित्यमर्थंविचारयेत् ॥ १८ ॥ तत्त्वमस्यादिवाक्यंतुजीवब्रह्मैक्यबोधकम् ॥ ऐक्येज्ञातेनिर्भयस्तुमद्रूपोहिप्रजायते ॥ १९ ॥ पदार्थाव गतिःपूर्ववाक्यार्थावगतिस्ततः ॥ तत्पदस्यचवाक्यार्थोगिरेऽहंपरिकीर्तितः ॥ २० ॥ त्वंपदस्यचवाच्यार्थोजीवएवनसंशयः ॥ उभयोरैक्यम सिनापदेनप्रोच्यतेबुधैः ॥ २१ ॥ वाच्यार्थयोर्विरुद्धत्वादैक्यंनैवघटेतह ॥ लक्षणाऽतःप्रकर्तव्यातत्त्वमोःश्रुतिसंस्थयोः ॥२२॥ चिन्मात्रंतुत योर्लक्ष्यंतयोरैक्यस्यसंभवः ॥ तयोरैक्यंतथाज्ञात्वास्वाभेदेनाद्वयोभवेत् ॥ २३ ॥

कथंवाक्यंविचारणीयमितिचेत्तत्राह।पदार्थावगतिरिति॥वाक्यार्थज्ञानंप्रतिपदार्थज्ञानस्यकारणत्वात्पूर्वंपदपदार्थंज्ञात्वावाक्यार्थंविचारयेदित्यर्थः॥तर्हिकोऽसावत्रपदार्थस्तत्राह । तत्पद स्येति॥हेगिरेपर्वततत्त्वमसीतिवाक्यस्थंयत्तत्पदंतस्यार्थोऽहंसर्वेश्वरीपरिकीर्तितः॥तत्पदंभुवनेश्वर्याः॥षड्गुणैश्वर्यसंपन्नायाममवाचकमित्यर्थः॥ २०॥ त्वंपदंतुजीववाचकमित्याह । त्वंपद स्येति॥उभयोर्जीवेश्वरयोरैक्यमसिपदेनोच्यतइत्याह।उभयोरिति॥ २१॥ननुजीवेश्वरयोरत्यंतविरुद्धधर्मवतोःकथंश्रुत्याऽभेदःप्रतिपाद्यतेइतिचेद्भागलक्षणयेत्याह ।वाच्यार्थयोरिति ॥ वा च्यार्थयोर्जीवेश्वरयोर्विरुद्धधर्मवत्त्वादित्यर्थः॥ जीवस्यासर्वज्ञत्वपरिच्छिन्नत्वादयोनिकृष्टधर्माःईश्वरस्यसर्वज्ञत्वव्यापकत्वादयउत्कृष्टधर्माःतथाचविरुद्धधर्मविशिष्टयोस्तयोरैक्यमभेदोनैव घटेतहइदंसत्यमित्यर्थः॥तर्हिकथमभेदःप्रतिपाद्यतइतिचेतत्राह। लक्षणातइति॥यतोविरुद्धयोरैक्यंनघटतेतस्माच्छ्रुतिस्थयोस्तत्त्वमोस्तत्त्वंपदयोर्लक्षणाकर्तव्येत्यर्थः॥ २२॥ ननुकस्मिन्नर्थे लक्षणाकर्तव्यातत्राह।चिन्मात्रंत्विति॥सर्वज्ञत्वादिविशिष्टंब्रह्मचैतन्यमीश्वरः॥असर्वज्ञत्वादिविशिष्टंब्रह्मचैतन्यंजीवः॥तत्रधर्मद्वयंविहायचिन्मात्रमेवभागत्यागलक्षणयाग्राह्यम्॥ तास्मि न्गृहीतेतयोर्लक्षणार्थयोरैक्यस्यसंभवोऽस्तीत्यर्थः॥ननुतादृशाभेदज्ञानेनकिंभविष्यतितत्राह।तयोरिति ॥ स्वाभेदेनतयोरैक्यंज्ञात्वाऽद्वयोभवेदिदंमहाफलमस्तीतिभावः ॥ २३ ॥

ननुलोकेभागत्यागलक्षणाक्वदृष्टेतिचेत्तत्राह । देवदत्तःसएवेति ॥ सोऽयंदेवदत्तइत्यत्रतत्कालाविशिष्टदेवदत्तस्यैतत्कालविशिष्टदेवदत्तस्यभेदेऽपितत्कालवैशिष्ट्यैतत्कालवैशिष्ट्यरूपधर्मद्वयत्यागेनाऽविरुद्धांव्यक्तिभागत्यागलक्षणयागृहीत्वाभेदप्रत्यभिज्ञाक्रियतेइतितत्रलक्षणास्मृतादृष्टेत्यर्थः ॥ अनेनानुभवेनस्थूलादिदेहत्रयरहितोभवतीत्याह । स्थूलादीति ॥ २४ ॥ देहत्रयंस्पष्टयति । पंचीकृतेति ॥२५॥ मिथ्यात्वेहेतुः। मायामयत्वतइति ॥ २६ ॥ २७ ॥ अंतःकरणेसुखदुःखादेरवबोधकइत्युक्तम् ॥ २८ ॥ २९ ॥ देहत्रयइति ॥ स्थूलसूक्ष्मकारणदेहत्रयमध्येएवंपंचकोशाअन्नमयप्राणमयमनोमयविज्ञानमयानंदमयाख्याअंतर्भूताभवंतीत्यर्थः ॥३०॥ ततश्चदेहत्रयत्यागेनपंचकोशत्यागेसतिब्रह्मपुच्छंप्रतिष्ठतिश्रुत्युक्तंवस्तुलभ्यतइत्यर्थः॥ तदेवब्रह्मनेतिनेतीत्यादिवाक्यैःसर्वनिषेधावधित्वेनोच्यतइत्यर्थः ॥ ३१ ॥ इदंयद्ब्रह्मरूपंतन्नजायतेनोत्पद्यते ॥ नवाम्रियते तथाऽयमात्माभूत्वानबभूव ॥ किंतुअनुत्पन्नोनिरंतरंबभूवेत्यर्थः ॥ तत्रहेतुरजोनित्यइत्यादिः ॥ विकारत्रयनिषेधेनषड्भावविकाराअपिप्रत्याख्यातावेदितव्याः॥ ३२ ॥ ३३ ॥ अणोरिति ॥ अणुतोप्यणुतरः ॥ महतोव्योमादेरपिमहत्तरः ॥

देवदत्तःसएवाऽयमितिवल्लक्षणास्मृता ॥ स्थूलादिदेहरहितोब्रह्मसंपद्यतेनरः ॥ २४॥ पंचीकृतमहाभूतसंभूतःस्थूलदेहकः ॥ भोगालयोजराव्याधिसंयुतःसर्वकर्मणाम् ॥ २५ ॥ मिथ्याभूतोऽयमाभातिस्फुटंमायामयत्वतः ॥ सोऽयंस्थूलउपाधिःस्यादात्मनोमेनगेश्वर ॥ २६ ॥ ज्ञानकर्मेंद्रिययुतंप्राणपंचकसंयुतम् ॥ मनोबुद्धियुतंचैतत्सूक्ष्मंतत्कवयोविदुः ॥ २७ ॥ अपंचीकृतभूतोत्थंसूक्ष्मदेहोऽयमात्मनः॥ द्वितीयोऽयमुपाधिःस्यात्सुखादेरवबोधकः ॥ २८ ॥ अनाद्यनिर्वाच्यमिदमज्ञानंतुतृतीयकः ॥ देहोऽयमात्मनोभातिकारणात्मानगेश्वर ॥ २९ ॥ उपाधिविलयेजातेकेवलात्मावशिष्यते ॥ देहत्रयेपंचकोशाअंतःस्थाःसंतिसर्वदा ॥ ३० ॥ पंचकोशपरित्यागेब्रह्मपुच्छंहिलभ्यते ॥ नेतिनेतीत्यादिवाक्यैर्मम्रूपंयदुच्यते ॥ ३१ ॥ नजायतेम्रियतेतत्कदाचिन्नाऽयंभूत्वानबभूवकश्चित्॥अजोनित्यःशाश्वतोऽयंपुराणोनहन्यतेहन्यमानेशरीरे ॥३२॥ ॥ हतंचेन्मन्यतेहंतुंहतश्चेन्मन्यतेहतम् ॥ उभौतौनविजानीतोनाऽयंहंतिनहन्यते ॥३३॥ अणोरणीयान्महतोमहीयानात्मास्यजंतोर्निहितोगुहायाम् ॥ तमक्रतुःपश्यतिवीतशोकोधातुःप्रसादान्महिमानमस्य ॥३४॥ आत्मानंरथिनंविद्धिशरीरंरथमेवतु ॥ बुद्धिंतुसारथिंविद्धिमनःप्रग्रहमेवच ॥ ३५ ॥ इंद्रियाणिहयानाहुर्विषयांस्तेषुगोचरान् ॥ आत्मेंद्रियमनोयुक्तंभोक्तेत्याहुर्मनीषिणः ॥३६॥ यस्त्वविद्वान्भवतिचाऽमनस्कश्चसदाऽशुचिः ॥ नतत्पदमवाप्नोतिसंसारंचाधिगच्छति ॥ ३७ ॥

गुहायांबुद्धौनिहितःस्थापितस्तत्राऽनुभवात्॥अस्यात्मनोमहिमानंतंधातुःप्रसादाच्चित्तप्रसादादक्रतुःसंकल्पविकल्परहितःपश्यति ॥ ततोवीतशोकोभवतीत्यर्थः ॥ ३४ ॥ अथकठवल्ल्युक्तरथरूपकल्पनामाह । आत्मानमिति॥रथिनंरथस्वामिनमात्मानंविद्धि शरीरमेवरथंविद्धिमनःप्रग्रहमश्वाकर्षणरज्जुभूतंविद्धि ॥ ३५ ॥ इंद्रियाण्येवहयास्तस्मिन्रथेविद्वांसआहुः ॥ गोचरान्गंतव्यमार्गान्विषयानाहुर्विषयेष्वेवानिरंतरमस्यगमनात्॥ रथिनःपूर्वोक्तस्याविशिष्टरूपमाह । आत्मेन्द्रियेति॥आत्माचिदाभासःइंद्रियाणिमनश्चेत्येतत्त्रितयविशिष्टंकूटस्थमितिशेषः ॥ अर्थात्तंतादृशंकूटस्थंभोक्तेत्याहुर्भोक्तारंरथिनमाहुरित्यर्थः ॥ इतिशब्देनकर्मत्वस्याभिधानाद्द्वितीयाभावः ॥ ३६ ॥ एवंसतियस्तुपुरुषोऽविद्वानविवेकीभवति अमनस्कोऽस्वाधीनमनाश्चभवतिसदाऽशुचिश्चसत्कर्मरहितइत्यर्थः ॥ सपुरुषोनतत्पदंपरमात्मपदंप्राप्नोति किंतर्हिसंसारंचाऽधिगच्छतिसंसारंप्रत्येवगच्छतीत्यर्थः ॥ ३७ ॥

यस्तुतद्विपरीतोभवतितत्राह । यस्त्विति ॥ यस्माद्भूयोनजायतेतत्पदमित्यर्थः ॥ ३८ ॥ किंतत्पदंतदाह । विज्ञानसारथिरिति ॥ मदीयंयत्परमंपदम् ॥ पद्यतेज्ञानिभिःप्राप्यतेयन्म
दीयंपरमंरूपंसच्चिदानंदघनंतत्परमंपदमित्यर्थः ॥ ३९ ॥ उपसंहरति । इत्थमिति ॥ श्रुत्यावेदांतश्रवणेन ॥ मत्याश्रुतस्यमननेननिश्चित्यसंशयविपर्यासरहितंपरोक्षतोज्ञात्वासाक्षा
त्कारार्थमात्मनांतःकरणेनाऽऽत्मरूपांमांनिदिध्यासनतएकाग्रचित्तवृत्त्याभावयेदित्यन्वयः ॥ ४० ॥ इत्थंनिदिध्यासनाभ्यासेनयदासमाधियोग्यताचित्तस्यभवतितदासमाधेःपूर्वमित्थं
ध्यानंकृत्वासमाधिंकुर्यादित्याह । योगवृत्तेरिति ॥ समाधिवृत्तेःपुरापूर्वंस्वस्मिन्स्वशरीरेदेवीप्रणवसंज्ञस्यमायाबीजमंत्रस्याऽक्षरत्रयंवक्ष्यमाणंभावयेत् मंत्रवाच्ययोर्मायाबीजमंत्रार्थयोः
समष्टिव्यष्ट्योर्ध्यानार्थमित्यर्थः ॥ ४१ ॥ तदेवाक्षरत्रयंतद्देवताभावनास्थानानिचाह । हकारइति ॥ कारणात्माकारणदेहरूपईकारइत्यर्थः ॥ ह्रींकारोऽहंतुरीयकम् ॥ अहंयत्तुरीयकं
तद्ध्रींकारवाच्यमित्यर्थ इतिदेवीवाक्यमेतत् ॥ तुरीयस्यवाचकोह्रींकारइतियावत् ॥ ४२ ॥ यथाव्यष्टिदेहेऽक्षरत्रयभावनाकृतातथैवसमष्टिदेहेऽपिकर्तव्येत्याह । एवंसमष्टीति ॥ अक्षर

यस्तुविज्ञानवान्भवतिसमनस्कःसदाशुचिः ॥ सतुतत्पदमाप्नोतियस्माद्भूयोनजायते ॥ ३८ ॥ विज्ञानसारथिर्यस्तुमनः प्रग्रहवान्नरः ॥ सो
ध्वनःपारमाप्नोतिमदीयंयत्परंपदम् ॥ ३९ ॥ इत्थंश्रुत्याचमत्याचनिश्चित्यात्मानमात्मना ॥ भावयेन्मामात्मरूपांनिदिध्यासनोतोपिच ॥
४० ॥ योगवृत्तेःपुरास्वस्मिन्भावयेदक्षरत्रयम् ॥ देवीप्रणवसंज्ञस्यध्यानार्थंमंत्रवाच्ययोः ॥ ४१ ॥ हकारःस्थूलदेहःस्याद्रकारः सूक्ष्म
देहकः॥ ईकारःकारणात्मासौह्रींकारोहंतुरीयकम् ॥ ४२ ॥ एवंसमष्टिदेहेऽपिज्ञात्वाबीजत्रयंक्रमात्॥ समष्टिव्यष्ट्योरेकत्वंभावयेन्मतिमान्नरः
॥ ४३ ॥ समाधिकालात्पूर्वंतुभावयित्वैवमादृतः ॥ ततोध्यायेन्निलीनाक्षोदेवींमांजगदीश्वरीम् ॥ ४४ ॥ प्राणापानौसमौकृत्वानासाभ्यंतर
चारिणौ ॥ निवृत्तविषयाकांक्षोवीतदोषोविमत्सरः ॥ ४५ ॥ भक्त्यानिर्व्याजयायुक्तोगुहायांनिःस्वनेस्थले ॥ हकारंविश्वमात्मानंरकारेप्रवि
लापयेत् ॥ ४६ ॥ रकारंतैजसंदेवमीकारेप्रविलापयेत् ॥ ईकारंप्राज्ञमात्मानंह्रींकारेप्रविलापयेत् ॥ ४७ ॥ वाच्यवाचकताहीनंद्वैतभावविव
र्जितम् ॥ अखंडंसच्चिदानंदंभावयेत्तच्छिखांतरे ॥ ४८ ॥ इतिध्यानेनमांराजन्साक्षात्कृत्यनरोत्तमः ॥ मद्रूपएवभवतिद्वयोरप्येकतायतः
॥ ४९ ॥ योगयुक्त्याऽनयादृष्ट्वामामात्मानंपरात्परम् ॥ अज्ञानस्यसकार्यस्यतत्क्षणेनाशकोभवेत् ॥ ५० ॥ इतिश्रीदेवीभागवतेमहापुराणेस
प्तमस्कंधेदेवीगीतायांचतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

त्रयभावनांकृत्वासमष्टिव्यष्ट्योःपिंडब्रह्मांडयोरेकत्वन्यायेनैकत्वंभावयेदित्याह ॥ समष्टिव्यष्ट्योरिति ॥ ४३ ॥ इत्थंप्रथमतोभावनांकृत्वाततोदेवींध्यायेदित्याह । समाधीति ॥ ४४ ॥
समाधिसामग्रीमाह । प्राणापानाविति ॥ समौकृत्वाप्राणायामाभ्यासेनेत्यर्थः ॥ ४५ ॥ विलापनप्रकारमाह । हकारंविश्वमिति । विश्वंवैश्वानरात्मकमित्यर्थः ॥ विश्वशब्दस्यवैश्वान
रोपलक्षणत्वात् ॥ एवमुत्तरत्रापि॥रकारेइति ॥ रकारवाच्यसूक्ष्मदेहेहकारवाच्यंस्थूलदेहंविलापयेदित्यर्थः॥४६॥ ईकारेतद्वाच्येकारणदेहेसूक्ष्मदेहंविलापयेदित्यर्थः ॥ ह्रींकारेह्रींकारवा
च्येब्रह्मणिईकारवाच्यंकारणदेहंविलापयेदित्यर्थः ॥ ४७ ॥ तच्छिखांतरेचैतन्याग्निदीपशिखांतरइत्यर्थः ॥ तथाचश्रुतिः ॥ तस्याःशिखायामध्येपरमात्माव्यवस्थितइति ॥ ४८ ॥
एवंध्यानेनसाक्षात्कारोभवतिनेनचमद्रूपएवभवतीत्याह । इतिध्यानेनेति ॥ ४९ ॥ दृष्ट्वानाशकोभवेदित्यन्वयः विस्तरस्तुमत्कृतदेवीगीताबृहट्टीकायांद्रष्टव्यः ॥ ५० ॥ इतिश्रीदेवीभा
गवतीतिलकेसप्तमस्कंधेचतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

अर्धाधिकद्विषष्ट्याचातुश्लोकानामत्रसादरम् ॥ योगस्यमंत्रसिद्धेश्वसाधनंसम्यगुच्यते ॥ १ ॥ पूर्वाध्यायांतेयोगयुक्तयाऽनयादृष्टुंमामात्मानंपरात्परमितिवाक्येनात्मदर्शनेयोगस्यसाधनत्व
मुक्तंतत्रकीदृशोयोगइतिपृच्छति । योगंवदेति ॥ संवित्प्रदायकंब्रह्माकारसंवित्साधनमित्यर्थः ॥ १ ॥ ऐक्यमिति ॥ जीवात्मनोरैक्यमभेदविषयकवृत्तिर्यासायोगशब्देनोच्यतइत्यर्थः
॥ २ ॥ तत्प्रत्यूहास्तस्यावृत्तेःशत्रवःकेतेषट्तदाह। कामक्रोधाविति । एतेपदार्थाःप्रसिद्धाएव॥ ३ ॥ योगांगैरिति॥योगांगैर्यमनियमादिभिर्वक्ष्यमाणैःप्रथमतस्ताञ्छत्रून्भित्त्वानाशयित्वानंतरं
योगिनोयोगंतांवृत्तिमाप्नुयुरित्यर्थः॥योगांगान्याह । यममिति ॥ ४ ॥ ५ ॥ अष्टस्वंगेषुप्रथमांगस्ययमस्यस्वरूपमाह । अहिंसेति॥अहिंसापरपीडनाभावः । सत्यंसत्यभाषणम्॥अस्तेयंचौ
र्यमात्रस्याऽभावः ॥ ब्रह्मचर्यम् दर्शनंस्पर्शनंकेलिःकीर्तनंगुह्यभाषणम् ॥ संकल्पोऽध्यवसायश्चक्रियानिर्वृत्तिरेवचेत्यष्टविधमैथुनत्यागः॥ दया भूतेषुकरुणा॥ आर्जवमृजुता सर्वापेक्षया
स्वस्याल्पत्वज्ञानम् ॥ क्षमा अपमानादिसहनशीलत्वंपृथिवीवत् ॥ धृतिःसर्वनाशेपिधीरता ॥ मिताहारःद्वौभागौपूरयेदन्नैस्तोयेनैकंप्रपूरयेत्॥मारुतस्यप्रचारार्थंचतुर्थमवशेषयेदितिरी

हिमालयउवाच ॥ योगंवदमहेशानिसांगंसंवित्प्रदायकम् ॥ कृतेनयेनयोग्योऽहंभवेयंतत्त्वदर्शने ॥ १ ॥ श्रीदेव्युवाच ॥ नयोगोनभसःपृष्ठे
नभूमौनरसातले ॥ ऐक्यंजीवात्मनोराहुर्योगंयोगविशारदाः ॥ २ ॥ तत्प्रत्यूहाःषडाख्यातायोगविघ्नकरानघ ॥ कामक्रोधौलोभमोहौमदमा
त्सर्यसंज्ञकौ ॥ ३ ॥ योगांगैरेवभित्त्वातान्योगिनोयोगमाप्नुयुः ॥ यमंनियममासनप्राणायामौततःपरम् ॥ ४ ॥ प्रत्याहारंधारणाख्यंध्यानं
सार्धंसमाधिना ॥ अष्टांगान्याहुरेतानियोगिनांयोगसाधने ॥ ५ ॥ अहिंसासत्यमस्तेयंब्रह्मचर्यंदयार्जवम् ॥ क्षमाधृतिर्मिताहारःशौचंचेतिय
मादश ॥ ६ ॥ तपःसंतोषआस्तिक्यंदानंदेवस्यपूजनम् ॥ सिद्धांतश्रवणंचैवह्रीर्मतिश्चजपोहुतम् ॥ ७ ॥ दशैतेनियमाःप्रोक्तामयापर्वतनाय
क ॥ पद्मासनंस्वस्तिकंचभद्रंवज्रासनंतथा ॥ ८ ॥ वीरासनमितिप्रोक्तंक्रमादासनपंचकम् ॥ ऊर्वोरुपरिविन्यस्यसम्यक्पादतलेशुभे ॥ ९ ॥
अंगुष्ठौचनिबध्नीयाद्धस्ताभ्यांव्युत्क्रमात्ततः ॥ पद्मासनमितिप्रोक्तंयोगिनांहृदयङ्गमम् ॥ १० ॥ जानूर्वोरंतरेसम्यक्कृत्वापादतलेशुभे ॥ ऋजु
कायोविशेद्योगीस्वस्तिकंतत्प्रचक्षते॥ ११ ॥सीवन्याःपार्श्वयोर्न्यस्यगुल्फयुग्मंसुनिश्चितम्॥वृषणाधःपादपार्ष्णीपार्ष्णिभ्यांपरिबंधयेत् ॥ १२ ॥

त्याऽल्पाऽऽहारः ॥ शौचंबाह्याभ्यंतरशुद्धिः ॥ इतिदशसंख्यायमाइत्यर्थः॥ ६ ॥ नियमस्वरूपमाह । तपइति ॥ तपोविध्युक्तानुष्ठानं नक्तकृच्छ्रादि ॥ तस्यशरीरक्लेशकारित्वेनयोगोपकारकत्वा
भावात् ॥ संतोषोनामप्रारब्धेनयदुपस्थापितंतेनैवचेतसस्तृप्तिः ॥ आस्तिक्यंवेददेवाद्विजगुरुविश्वासः ॥ दानं यथाशक्तिसत्पात्रेद्रव्यत्यागः ॥ देवस्यपरमेश्वरस्यपूजनम् ॥ सिद्धांत
श्रवणंवेदांतश्रवणम् ॥ ह्रीः अकार्यकरणेलज्जा ॥ मतिःसत्कर्मसच्छास्त्रविषयेज्ञानम्॥ जपोगायत्रीप्रणवभुवनेश्वरीमंत्रप्रभृतिमंत्राणाम् ॥ हुतं नित्यहोमादि॥ ७ ॥आसनान्याह । पद्मा
सनमिति ॥ ८ ॥ ९ ॥ व्युत्क्रमादिति ॥ पृष्ठदेशाद्धस्तद्वयंपरिवर्त्याऽऽनीयदक्षिणहस्तेनदक्षिणपादांगुष्ठंवामहस्तेनवामपादांगुष्ठंबध्नीयादित्यर्थः ॥ १० ॥ ११ ॥ सीवन्याइति ॥ सीवनीअंडाध
स्थाशिरा ॥ गुल्फौवृषणाधः स्थितौयौपादयोः पार्ष्णिभागौतौहस्ताभ्यांबंधयेत् ॥ १२ ॥

॥ १३ ॥ १४ ॥ इडयावामनासापुटेनषोडशमात्रयाषोडशप्रणवोच्चारणेनबाह्यंवायुमाकर्षयेत् ॥ यद्यपिमात्राऽत्रयोगशास्त्रोक्तापारिभाषिकीउक्ता तथापितस्याअपिवायुपरिच्छेदएव
तात्पर्याद्येनवायुपरिच्छेदोभवतितद्ग्राह्यमित्यत्रतात्पर्यात् ॥ १५ ॥ धारयेत् चतुःषष्टिसंख्यप्रणवोच्चारणपर्यंतकुंभकंकुर्यादित्यर्थः । पुनर्द्वात्रिंशत्प्रणवोच्चारणेनदक्षनासापुटेनविरेचये
दित्यर्थः ॥ १६ ॥ १७ ॥ भूयोभूयःपुनःपुनःतस्यइडापिंगलादेःपुमरिडापिंगलादेःपुनःपिंगलेडादेःक्रमात् बाह्यंवायुमेवंसमाचरेत् गृह्णीयात्त्यजेच्चेत्यर्थः ॥ मात्राणांप्रणवसंख्यानामप्यु
त्तरोत्तरंवृद्धिःकर्तव्यातथाप्राणायामानामपिप्रथमतोद्वादशतदुत्तरंकतिचित्कालानंतरंषोडशेत्येवंक्रमेणवृद्धिःकर्तव्येत्यर्थः ॥ १८ ॥ सगर्भविगर्भभेदेनप्राणायामस्यद्वैविध्यमाह । जप
ध्यानादिभिरिति ॥ स्वेष्टमंत्रजपध्यानसहितःप्राणायामःसगर्भः ॥ तदपेतस्तद्रहितोविगर्भःइत्यर्थः ॥ १९ ॥ कनिष्ठमध्यमोत्तमभेदेनप्राणायामलक्षणमाह । क्रमादभ्यस्यतइति ॥
प्राणायामेप्रथमतःस्वेदोद्गमोभवतिसोऽधमःप्राणायामः ॥ कंपसंयुक्तोमध्यमः ॥ भूमित्यागोभवतियस्मिन्प्राणायामे सउत्तमः ॥ भूमिंत्यक्त्वाऽऽसनमुपर्येवतिष्ठतियदातदासभूमित्या
गइतिसंप्रदायः ॥ तदुक्तम् । भूमित्यागंतनोतिपरइति ॥ २० ॥ उत्तमप्राणायामसिद्धिपर्यंतप्राणायामेकृतेसतिफलमाह । उत्तमस्येति ॥ गुणावाप्तिःवपुःप्रकाशोज्ज्वलनस्यदीप्तिर

भद्रासनमितिप्रोक्तंयोगिभिःपरिपूजितम् ॥ ऊर्वोःपादौक्रमान्न्यस्यजान्वोःप्रत्यङ्मुखांगुली ॥ १३ ॥ करौविदध्यादाख्यातंवज्रासनमनुत्तमम् ॥ एकंपादमधःकृत्वाविन्यस्योरुतथोत्तरे ॥ १४ ॥ ऋजुकायोविशेद्योगीवीरासनमितीरितम् ॥ इडयाकर्षयेद्वायुंबाह्यंषोडशमात्रया॥१५॥ धारयेत्पूरितंयोगीचतुःषष्ट्यातुमात्रया ॥ सुषुम्नामध्यगंसम्यग्द्वात्रिंशन्मात्रयाशनैः ॥ १६॥ नाड्यापिंगलयाचैवरेचयेद्योगवित्तमः ॥ प्राणायाममिमंप्राहुर्योगशास्त्रविशारदाः ॥ १७ ॥ भूयोभूयःक्रमात्तस्यबाह्यमेवंसमाचरेत् ॥ मात्रावृद्धिःक्रमेणैवसम्यग्द्वादशषोडश ॥ १८ ॥ जपध्यानादिभिःसार्धंसगर्भंतंविदुर्बुधाः ॥ तदपेतंविगर्भंचप्राणायामंपरेविदुः ॥ १९ ॥ क्रमादभ्यस्यतःपुंसोदेहेस्वेदोद्गमोधमः ॥ मध्यमःकंपसंयुक्तोभूमित्यागःपरोमतः ॥२०॥ उत्तमस्यगुणावाप्तिर्यावच्छीलनमिष्यते॥इंद्रियाणांविचरतांविषयेषुनिरर्गलम्॥२१॥ बलादाहरणंतेभ्यःप्रत्याहारोभिधीयते ॥ अंगुष्ठगुल्फजानूरुमूलाधारलिंगनाभिषु ॥२२॥ हृद्ग्रीवाकंठदेशेषुलंबिकायांततोनसि ॥ भ्रूमध्येमस्तकेमूर्ध्निद्वादशांतेयथाविधि ॥ २३ ॥ धारणंप्राणमरुतोधारणेतिनिगद्यते ॥ समाहितेनमनसाचैतन्यांतरवर्तिना ॥२४॥ आत्मन्यभीष्टदेवानांध्यानंध्यानमिहोच्यते॥ समत्वभावनानित्यंजीवात्मपरमात्मनोः ॥ २५ ॥ समाधिमाहुर्मुनयःप्रोक्तमष्टांगलक्षणम् ॥ इदानींकथयेतेऽहंमंत्रयोगमनुत्तमम् ॥ २६ ॥

ल्पाशिताचैवतनोर्लघुत्वमित्यादिगुणानामवाप्तिर्भवति ॥ यावत्पर्यंतंशीलनमभ्यासइष्यतेतावत्पर्यंतमुत्तरोत्तरंगुणवृद्धिरेवभवतीत्यर्थः ॥ प्रत्याहारमाह । इंद्रियाणामिति ॥ विषयेषुवि
चरतामिंद्रियाणांतेभ्योनिरर्गलंनिर्विघ्नंयदाहरणंसप्रत्याहारः ॥२१ ॥ धारणामाह । अंगुष्ठेति ॥२२॥२३॥ धारणामिति ॥ अंगुष्ठाद्यवयवेषुयत्प्राणवायोर्धारणंनिरोधःसा धारणेत्यर्थः॥
एतादृशोवायुःस्वाधीनोपेक्षितइतिभावः ॥ ध्यानमाह । समाहीति ॥ अंतःकरणंचैतन्यांतर्वर्तिध्यानेन कृत्वातस्मिन्नात्मानिअभीष्टदेवानांयद्ध्यानंतद्ध्यानशब्देनाऽत्रोच्यतइत्यर्थः ॥
॥ २४ ॥ समत्वभावनाद्वयोरैक्यभावनासंप्रज्ञातसमाधिनैवभवतीतिसमत्वभावनाशब्देनसंप्रज्ञातसमाधिरुच्यते ॥ अतएवयोगसूत्रेतद्भाष्येचसंप्रज्ञातसमाधेरेवाष्टसुयोगांगेषुग्रहणंनिर्वि
कल्पकसमाधिस्त्वंगीभवतीत्युक्तम् ॥ २५ ॥ इत्थमष्टांगयोगमभिधायाऽधुनाशरीरेनाडीस्थानानिआधारचक्रस्वरूपाणितद्ध्यानफलानिचोपादिशति । इदानींकथयेतेऽहमिति ॥
मंत्रयोगंमंत्राणांशारदातिलकोक्तच्छिन्नादिदोषदुष्टानांमंत्राणांसिद्धिप्रदंयोगमित्यर्थः ॥ २६ ॥

विश्वंशरीरमिति ॥ पिंडब्रह्मांडयोरेकत्वाच्छरीरमिदंविश्वमेवभवतिब्रह्मांडमेवभवति ॥ तदपिपंचभूतात्मकंचंद्रसूर्याग्निभिर्युक्तंजीवब्रह्मैक्यरूपकंयथाभवतितथेदमप्यस्तीत्याह
पंचभूतेति ॥२७॥ तदर्धेनकोट्यर्धेनसार्धत्रिकोट्यइत्यर्थः॥२८॥ प्रधानासुषुम्नानाडीमेरुदंडपृष्ठस्थवंशोस्थितामूलाधारमारभ्यपृष्ठवंशमार्गेणब्रह्मरंध्रपर्यंतंगतेत्यर्थः ॥ तस्यावामेइडादक्षि
पिंगलाऽस्तीत्याह । इडावामेइति ॥२९॥ शक्तिरूपाप्रकृतिरूपा ॥ ३०॥ तस्यामध्येसुषुम्नायामध्येविचित्राख्येचित्राख्यनाड्यामित्यर्थः ॥ सुषुम्नामूलदेशेचित्रानाड्यस्तीतितस्यामध्ये
चित्राख्यानाडीसूक्ष्मातुवर्ततइतिवचनेनतंत्रांतरेउक्तम् ॥ ३१ ॥ मध्येइति । चित्रानाडीमध्येइत्यर्थः ॥ हरात्माबिंदुनादकम्आत्मामायाहकाररेफईकारबिंदुनादात्मकमित्यर्थः ॥३२
शिखाकारादीपाशिखाकारा ॥३३॥ हेमरूपाभंपीतवर्णम् ॥ वादिसांतचतुर्दलम् ॥ चतुर्दलेषुवशषसइतिचत्वारोवर्णाभवंतीत्यर्थः ॥३४ ॥ बादिलांतेति ॥ बकारादिलकारांतपड्वर्णैर्यु

विश्वंशरीरमित्युक्तंपंचमूतात्मकंनग ॥ चंद्रसूर्याग्नितेजोभिर्जीवब्रह्मैक्यरूपकम् ॥ २७॥ तिस्रःकोट्यस्तदर्धेनशरीरेनाड्योमताः ॥ तासुमुख्या
दशप्रोक्तास्ताभ्यस्तिस्रोव्यवस्थिताः ॥ २८ ॥ प्रधानामेरुदंडेऽत्रचंद्रसूर्याग्निरूपिणी ॥ इडावामेस्थितानाडीशुभ्रातुचंद्ररूपिणी ॥२९॥ शक्ति
रूपातुसानाडीसाक्षादमृतविग्रहा ॥ दक्षिणेयापिंगलाख्यापुंरूपासूर्यविग्रहा ॥ ३० ॥ सर्वतेजोमयीसातुसुषुम्नावह्निरूपिणी ॥ तस्यामध्येवि
चित्राख्येइच्छाज्ञानक्रियात्मकम्॥३१॥ मध्येस्वयंभूलिंगंतुकोटिसूर्यसमप्रभम्॥तदूर्ध्वंमायाबीजंतुहरात्माबिंदुनादकम्॥३२॥ तदूर्ध्वंतुशिखा
काराकुंडलीरक्तविग्रहा ॥ देव्यात्मिकातुसाप्रोक्तामदभिन्नानगाधिप ॥ ३३ ॥ तद्बाह्येहेमरूपाभंवादिसांतचतुर्दलम् ॥ द्रुतहेमसमप्रख्यंपद्मंतत्र
विचिंतयेत् ॥ ३४ ॥ तदूर्ध्वंत्वनलप्रख्यंषड्दलंहीरकप्रभम् ॥ बादिलांतषड्वर्णेनस्वाधिष्ठानमनुत्तमम् ॥ ३५ ॥ मूलमाधारषट्कोणंमूलाधारं
ततोविदुः ॥ स्वशब्देनपरंलिंगंस्वाधिष्ठानंततोविदुः ॥ ३६ ॥ तदूर्ध्वंनाभिदेशेतुमणिपूरंमहाप्रभम् ॥ मेघाभंविद्युदाभंचबहुतेजोमयंततः ॥
॥ ३७ ॥ मणिवद्भिन्नंतत्पद्मंमणिपद्मंतथोच्यते ॥ दशभिश्चदलैर्युक्तंडादिफांताक्षरान्वितम् ॥ ३८ ॥ विष्णुनाधिष्ठितंपद्मंविष्णवालोकनकारण
म्॥तदूर्ध्वेनाहतंपद्ममुद्यदादित्यसन्निभम्॥ ३९॥ कादिठांतदलैरेकंपत्रैश्वसमधिष्ठितम् ॥ तन्मध्येबाणलिंगंतुसूर्यायुतसमप्रभम्॥४०॥शब्दब्रह्म
मयंशब्दानाहतंतत्रदृश्यते ॥ अनाहताख्यंतत्पद्मंमुनिभिः परिकीर्तितम् ॥ ४१ ॥ आनंदसदनंतत्तुपुरुषाधिष्ठितंपरम् ॥ तदूर्ध्वंतुविशुद्धा
ख्यंदलंषोडशपंकजम् ॥ ४२ ॥ स्वरैःषोडशभिर्युक्तंधूम्रवर्णंमहाप्रभम् ॥ विशुद्धंतनुतेयस्माज्जीवस्यहंसलोकनात् ॥४३॥ विशुद्धंपद्ममाख्या
तमाकाशाख्यंमहाद्भुतम् ॥ आज्ञाचक्रंतदूर्ध्वेतुआत्मनाधिष्ठितंपरम् ॥ ४४ ॥

मित्यर्थः॥३५॥ स्वशब्देनपरंलिंगंतस्याधिष्ठानंयतस्तस्मात्स्वाधिष्ठानमित्युच्यतइत्यर्थः॥३६॥३७॥ भिन्नंविकसितम् ॥ डादिफांताक्षरैर्युक्तमित्यर्थः॥३८॥३९॥ अर्कपत्रैर्द्वादशपत्रैर्यु
ककारादिठकारांतानिद्वादशाक्षराणिदलेषुज्ञेयानि ॥ ४० ॥ शब्दानाहतम् अनाहतोनामताडनंविनापिजायमानःशब्दःसोऽनाहतःशब्दोयस्मिंस्तच्छब्दानाहतम् ॥ वाहिताग्न्यादिल
त्साधुः ॥ ४१ ॥ पुरुषाधिष्ठितंरुद्राधिष्ठितमित्यर्थः ॥ ४२ ॥ स्वरैःषोडशभिरिति ॥ षोडशपत्रेषुषोडशस्वराइत्यर्थः ॥ जीवस्यहंसस्यपरमात्मनोवलोकनाज्जीवंयस्माद्विशुद्धंतनुतेतत
विशुद्धमित्यन्वयः ॥ तत्राऽनाहतंचक्रंहृदयेविशुद्धिचक्रंकंठेआज्ञाचक्रं भ्रूमध्येइतितुग्रंथांतरादवसेयम् ॥ अनाहतशब्दोमध्यमवाणीरूपोज्ञेयः ॥ ४३ ॥ तदूर्ध्वेतुभ्रूमध्येइत्यर्थः॥ ४४

आज्ञासंक्रमणमिति ॥ तस्मिन्स्थलेनिहितचित्तस्यपुरुषस्यसर्वपदार्थसाक्षात्कारेणैवंभूतमेवंवर्ततेएवंभविष्यतीतिज्ञानेनाज्ञायाइतःपरंत्वयैवंकर्तव्यमितिपरमेश्वराज्ञायाःसंक्रमणंभवतितेन
हेतुनातदाज्ञाचक्रमितिकीर्तितमित्यर्थः ॥ हक्षवर्णद्वयसंयुतंपत्रद्वयमुक्तमित्यर्थः ॥४५ ॥ तदूर्ध्वंकैलासचक्रंतदूर्ध्वंरोधिनीचक्रमित्यर्थः ॥ अनयोःस्वरूपंमत्कृतदेवीगीताबृहट्टीकायांद्रष्ट
व्यम् ॥ ४६ ॥ सर्वोपरिविद्यमानंसहस्रारंचक्रमाह । सहस्रारेति ॥ बिंदुस्थानंपरमात्मस्थानमित्यर्थः ॥ इत्येतदिति ॥ पूर्वोक्तप्रकारेणैतत्सर्वंज्ञात्वेतिशेषः ॥ ४७ ॥ ज्ञात्वाकिंकर्तव्यं
तत्राह । आदाविति ॥ प्रथमतःपूरकयोगेनबाह्यंवायुमाकृष्यकुंभकंकृत्वास्वमनोवायुसहितंमूलाधारेयोजयेन्नयेदित्यर्थः ॥ अनंतरंगुदस्यमेढ्रस्यलिंगस्यांतरेमध्येमूलाधारचक्रेइत्यर्थः ॥
विद्यमानास्थितायाशक्तिःकुंडलिनीतामाकुंच्यमूलाधारगतवायुनापीडयित्वाप्रबोधयेत्उत्थापयेदित्यर्थः ॥ ४८ ॥ लिंगभेदेति ॥ तामुत्थाप्यलिंगभेदक्रमेणपूर्वोक्तचक्रगततत्तेजोमय
स्वयंभ्वादिलिंगानांभेदोभेदनंतन्मार्गेणनयनंतत्क्रमेणैवतांकुंडलिनींशक्तिंबिंदुचक्रंसहस्रारंतत्प्रापयेत् ॥ शंभुनेति ॥ सहस्रारपद्मास्थितेनशंभुनातांकुंडलिनीमेकीभूतांसंगतांविभावये

**आज्ञासंक्रमणंतत्रतेनाज्ञेतिप्रकीर्तितम् ॥ द्विदलंहक्षसंयुक्तंपद्मंतत्सुमनोहरम् ॥ ४५ ॥ कैलासाख्यंतदूर्ध्वंतुरोधिनीतुतदूर्ध्वतः ॥ एवंत्वाधारच
क्राणिप्रोक्तानितवसुव्रत ॥ ४६ ॥ सहस्रारयुतंबिंदुस्थानंतदूर्ध्वमीरितम् ॥ इत्येतत्कथितंसर्वंयोगमार्गमनुत्तमम् ॥ ४७ ॥ आदौपूरकयोगेना
प्याधारेयोजयेन्मनः ॥ गुदमेढ्रांतरेशक्तिस्तामाकुंच्यप्रबोधयेत् ॥ ४८ लिंगभेदक्रमेणैवबिंदुचक्रंचप्रापयेत् ॥ शंभुनातांपराशक्तिमेकीभूतांवि
चिंतयेत् ॥ ४९ ॥ तत्रोत्थितामृतंयत्तुद्रुतलाक्षारसोपमम् ॥ पाययित्वातुतांशक्तिंमायाख्यांयोगसिद्धिदम् ॥ ५० ॥ षट्चक्रदेवतास्तत्रसंत
र्प्यामृतधारया ॥ आनयेत्तेनमार्गेणमूलाधारंततःसुधीः ॥ ५१ ॥ एवमभ्यस्यमानस्याऽप्यहन्यहनिनिश्चितम् ॥ पूर्वोक्तदूषितामंत्राःसर्वेसि
ध्यंतिनान्यथा ॥ ५२ ॥ जरामरणदुःखाद्यैर्मुच्यतेभवबंधनात् ॥ येगुणाःसंतिदेव्यामेजगन्मातुर्यथातथा ॥५३॥ तेगुणाःसाधकवरेभवंत्येव
नचान्यथा ॥ इत्येवंकथितंतातवायुधारणमुत्तमम् ॥ ५४ ॥ इदानींधारणाख्यंतुशृणुष्वावहितोमम ॥ दिक्कालाद्यनवच्छिन्नदेव्यांचेतोविधाय
च ॥५५ ॥ तन्मयोभवतिक्षिप्रंजीवब्रह्मैक्ययोजनात् ॥ अथवासमलंचेतोयदिक्षिप्रंनसिद्ध्यति ॥ ५६ ॥ तदावयवयोगेनयोगीयोगान्समभ्य
सेत् ॥ मदीयहस्तपादादावंगेतुमधुरेनग ॥ ५७॥ चित्तंसंस्थापयेन्मंत्रीस्थानस्थानजयात्पुनः॥ विशुद्धचित्तःसर्वस्मिन्रूपेसंस्थापयेन्मनः॥
॥५८॥ यावन्मनोलयंयातिदेव्यांसंविदिपर्वत ॥ तावदिष्टमनुंमंत्रीजपहोमैःसमभ्यसेत् ॥ ५९॥ मंत्राभ्यासेनयोगेनज्ञेयज्ञानायकल्पते ॥ न
योगेनविनामंत्रोनमंत्रेणविनाहिसः ॥ ६० ॥**

दित्यर्थः ॥ ४९ ॥ तत्रोत्थितेति ॥ तत्रशिवशक्त्योःसंगमेयदुत्थितममृतंद्रुतलाक्षासमानवर्णंतदमृतंतांकुंडलिनींपाययित्वातेनआनंदरसरूपेणतांतृप्तांकृत्वेत्यर्थः ॥ ५० ॥ षट्चक्रेति ॥
पूर्वोक्तानियानिषट्चक्राणितच्चक्रस्थितादेवतालिंगरूपाअमृतधारयाशिवशक्तिसमागमोत्थानंदरसरूपामृतवृष्ट्यासंतर्प्यपुनर्येनैवमार्गेणमस्तकंनीताकुंडलिनीतेनैवमार्गेणमूलाधारंतांकुं
डलिनीमानयेदित्यर्थः ॥ ५१ ॥ पूर्वोक्तेति ॥ छिन्नादिदोषदूषितामंत्राअनेनयोगेनसिद्ध्यंतीत्यर्थः ॥ तदुक्तंशारदातिलके ॥ इत्यादिदोषदुष्टांस्तान्मंत्रानात्मनियोजयेत् ॥ शोधये
द्बद्धपवनोबद्ध्वायोनिमुद्रयेति ॥५२॥५३॥५४॥ प्रसंगेनधारणास्वरूपंपूर्वमुक्तमेवविषयभेदेनविशदयति ॥ इदानीमिति ॥ पूर्वमष्टांगयोगनिरूपणेवायुधारणोक्ता अत्रतुचित्तस्यधारणो
च्यतेइत्यर्थः ॥ अर्थःस्पष्टएव ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ इत्थंध्यानयोगकरणेयस्ययावद्योग्यतानास्तितावत्पर्यंतंतेनपुरुषेणकिंकर्तव्यमितिचेत्तत्राह । यावन्मनइति ॥ ५९ ॥ ६० ॥

॥ ६१ ॥ ६२ ॥ विस्तरस्तुमत्कृतदेवीगीताबृहट्टीकायांद्रष्टव्यः ॥ इतिश्रीदेवीभागवततिलकेसप्तमस्कंधेपंचत्रिंशोऽध्यायः ॥ ३५ ॥ त्रिंशच्छ्लोकैर्मुख्यतत्त्वंब्रह्मरूपंतुवर्ण्यते ॥ ब्रह्मविद्
दुर्लभेतियथावदभिधीयते ॥ १ ॥ अत्रार्धश्लोकोप्यधिकः ॥ एतादृशंयोगंसाधयित्वायद्वस्तुध्येयंतद्वर्णयति ॥ श्रीदेव्युवाचेति ॥ १ ॥ अत्राविःसन्निहितमित्यादिब्रह्मैवेदंविश्वंवरिष्ठमि
त्यंताःश्रुतयोमुंडकोपनिषदिअन्यूनानतिरिक्ताः संति ताश्चश्रुतयोभगवत्पादैःश्रीमच्छंकराचार्यैर्व्याख्याताएवमुंडकोपनिषद्भाष्येततस्तासांव्याख्यानंसंक्षेपेणैवक्रियते ॥ आविरिति
आविःशब्दोनिपातःप्रकाशवाची ब्रह्मविश्वोपलब्ध्यात्मनाप्रकाशमानमेवसदेतिभावयोदित्यर्थः ॥ सन्निहितमतिसमीपवर्ति गुहायांबुद्धौचरतितत्रोपलभ्यतेसर्वव्यापकमपीतिगुहाच
नाम ॥ पद्यतेसर्वैर्मुनिभिर्योगादिसाधनैःप्राप्यतेइतिपदंमहच्चतत्पदं चेतिमहत्पदम् ॥ अत्राऽस्मिन्ब्रह्मणिसर्वमाकाशादिसमर्पितंस्थापितंकल्पितमित्यर्थः ॥ ततस्तस्यमिथ्यात्वादिद
वसर्वैःप्राप्यमित्यर्थः ॥ किंकिमत्रसमर्पितंतदाह । एजदिति ॥ एजच्चलत्पक्ष्यादि ॥ प्राणत्प्राणितीतिप्राणन्मनुष्यादि ॥ निमिषच्चयन्निमेषादिक्रियावत् ॥ यच्चनिमिषम् ॥ चशब्द
तत्सर्वंब्रह्मण्येवसमर्पितामित्यर्थः ॥ २ ॥ एतज्जानथेति भगवतीवदति ॥ हेदेवाएतन्मद्रूपंब्रह्मजानथाऽवगच्छथ ॥ सदसद्वरेण्यं सत्कारणंमाया असत्कार्यंजगत् तदुभयापेक्षयावरेण्यं
ष्ठम् ॥ प्रजानांलोकानांविज्ञानात्परंतज्ज्ञानाविषयइत्यर्थः ॥ यतोवरिष्ठंश्रेष्ठंततोनसर्वबुद्धिगम्यमित्यर्थः ॥ यदर्चिमत्सूर्यादितेजसामपिप्रकाशकम् ॥ यतस्ततोऽतिशयदीप्तिमदित्यर्थ

द्वयोरभ्यासयोगोहिब्रह्मसंसिद्धिकारणम् ॥ तमःपरिवृतेगेहेघटोदीपेनदृश्यते॥६१॥ एवंमायावृतोह्यात्मामनुनागोचरीकृतः ॥ इतियोगविधिः कृत्स्नःसांगःप्रोक्तोमयाऽधुना ॥६२॥ गुरूपदेशतोज्ञेयोनान्यथाशास्त्रकोटिभिः ॥ इति श्रीदेवीभागवते महापुराणे सप्तमस्कंधे पंचत्रिंशोऽध्यायः ॥ ३५ ॥ देव्युवाच ॥ इत्यादियोगयुक्तात्माध्यायेन्मांब्रह्मरूपिणीम् ॥ भक्त्यानिर्व्याजयाराजन्नासनेसमुपस्थितः ॥ १ ॥ आविःसन्निहितंगुहाचरंनाममहत्पदम् ॥ अत्रैतत्सर्वमर्पितमेजत्प्राणन्निमिषच्चयत् ॥ २ ॥ एतज्जानथसदसद्वरेण्यंपरंविज्ञानाद्यद्वरिष्ठंप्रजानाम् ॥ यदर्चिमद्यदणुभ्योऽणुचयस्मिँल्लोकानिहितालोकिनश्च ॥ ३ ॥ तदेतदक्षरंब्रह्मसप्राणस्तदुवाङ्मनः ॥ तदेतत्सत्यममृतंतद्वेद्धव्यंसौम्यविद्धि ॥ ४ ॥ धनुर्गृहीत्वौपनिषदंमहास्त्रंशरंह्युपासानिशितंसंधयीत ॥ आयम्यतद्भावगतेनचेतसालक्ष्यंतदेवाक्षरंसौम्यविद्धि ॥ ५ ॥ प्रणवोधनुःशरोह्यात्माब्रह्मतल्लक्ष्यमुच्यते ॥ अप्रमत्तेनवेद्धव्यंशरवत्तन्मयोभवेत् ॥ ६ ॥

यस्मिन्भूरादयोलोकास्तन्निवासिजनालोकिनश्चनिहिताःस्थापिताःकल्पिताइत्यर्थः ॥ ३ ॥ तदेतदिति ॥ तदेतत्सर्वाश्रयमक्षरंब्रह्मसप्राणस्तदुतदेववाङ्मनोपितदेतत्सत्यमवितथ
तोमृतंतद्वेद्धव्यंमनसाशरेणताडयितव्यंमनःसमाधानंतत्रकर्तव्यमित्यर्थः ॥ ४ ॥ कथंवेद्धव्यंतदुच्यते । धनुरिति ॥ औपनिषदमुपनिषद्भिर्बोधितम् ॥ महास्त्रंमहच्चतदस्त्रंचेतिमहा
धनुगृहीत्वाऽऽदायतथोपासाभिर्निशितंसंतताभिध्यानेनतनूकृतंशरंतस्मिन्धनुषिसंधयीतयोजयेत् ॥ शरंसंधायसंस्थाप्यानंतरमायम्याकृष्यसेंद्रियमंतःकरणंस्वविषयाद्विनिवर्त्यलक्ष्ये
स्थापयित्वेत्यर्थः ॥तद्भावगतेनतस्मिन्ब्रह्मण्यक्षरेलक्ष्येभावनाभावस्तद्गतेनचेतसालक्ष्यंतदेवयथोक्तलक्षणमक्षरम्॥सौम्यहेपर्वतराज विद्धिताडयेत्यर्थः॥५॥यदुक्तंधनुरादितदुच्यते । प्र
वइति ॥ प्रणवॐकारोदेवीप्रणवोवाधनुर्यथेष्वासनंलक्ष्येशरस्यप्रवेशकारणंतथाचित्तशरस्याऽक्षरेलक्ष्येप्रवेशकारणंप्रणवः प्रणवेनह्यभ्यस्यमानेनसंस्क्रियमाणःतदालंबनोऽप्रतिबंधेनाऽक्षरे
तिष्ठते ॥ यथाधनुषाप्रक्षिप्तइषुर्लक्ष्येऽतःप्रणवोधनुरिवधनुःशरोह्यात्मांतःकरणंहिशरःशरसदृशलक्ष्यवेधनाच्छरइवशरः ॥ अत्रलक्ष्यंतुतद्ब्रह्मैवोच्यतइत्याह । ब्रह्मतल्लक्ष्यमुच्यतइति
अप्रमत्तेनैकाग्रचेतसातल्लक्ष्यंब्रह्मवेद्धव्यंयथाशरोलक्ष्यैकात्मतांप्राप्नोति तथादेहाद्यात्मप्रत्ययतिरस्कारेणाऽक्षरैक्यात्म्यंफलमापादयेदित्यर्थः ॥ ६ ॥

अक्षरस्यदुर्लक्ष्यत्वात्पुनःपुनर्वचनंसुलक्षणार्थम् । यस्मिन्निति॥यस्मिन्नक्षरेद्यौःपृथिवीचांतरिक्षंचप्राणैःसहमनश्चसमर्पितंतमेवैकमात्मानंजानथजानीथ॥ हेदेवायंज्ञात्वाचाऽन्यवाचोपरावि
द्यारूपाविमुंचथविमुंचतपरित्यजत॥यतोऽमृतस्यमोक्षस्यप्राप्तयेयंसेतुरिवसेतुः॥संसारमहोदधेस्तरणहेतुरित्यर्थः ॥तथाचश्रुतिः ॥ तमेवविदित्वातिमृत्युमेति नाऽन्यःपंथाविद्यतेऽयना
येति ॥७॥किंच अराइवेति॥यथारथनाभौसमर्पिताअराइवसंहताःसंप्रविष्टाएवंयत्रयस्मिन्हृदयेनाड्यस्तस्मिन्हृदयेबुद्धिप्रत्ययसाक्षिभूतःसएषप्रकृतआत्मांतर्मध्येचरतेचरतिवर्ततेबुद्ध्या
दिप्रत्ययैर्जायमानइवजायमानोंतःकरणोपाध्यनुविधायित्वाद्वदंतिलौकिकाःहृष्टोजातःक्रुद्धोजातइति ॥ ८ ॥ तमात्मनामोमित्येवोंकारालंबनाःसंतोयथोक्तकल्पनयाध्यायथचिंतयत॥
तेषांकल्याणार्थमाशीर्वचनंभगवतीकरुणानिधिर्वदति॥स्वस्तिनिर्विघ्नमस्तुवोयुष्माकंपारायपरकूलप्राप्तये॥ तमसोऽविद्यातःपरस्तादविद्यारहितब्रह्मात्मस्वरूपगमनायेत्यर्थः ॥ सआत्मा
क्ववर्ततेतत्राह।यःसर्वज्ञोयश्चसर्वविद्यस्यैषमहिमाविभूतिजगत्सर्जनादिरूपोभुविप्रसिद्धःसादिव्येद्योतनवतिब्रह्मपुरेहृदयपुंडरीकेतत्रतस्यप्रकाशमानत्वात्तस्मिन्हृत्कमलेयद्व्योमाकाशस्त
स्मिन्प्रतिष्ठितइवोपलभ्यते॥९॥ सह्यात्मामनोवृत्तिभिरेवविभाव्यतइतिमनोमयः ॥प्राणश्चशरीरंचतयोरयंनेता॥शरीराच्छरीरांतरंप्रतिप्रतिष्ठितोवस्थितोऽन्नेऽन्नपरिणामेपिंडेहृदयंबुद्धिंसं
निधायसमवस्थाप्यतद्विज्ञानेनतत्साक्षात्कारेणपरिपश्यंतिसर्वतःपूर्णंपश्यंतिधीराविवेकिनः॥आनंदरूपंदुःखासंस्पृष्टममृतंयद्विभातिसर्वदातादित्यर्थः ॥ १० ॥ अस्यात्मज्ञानस्यफलमभि

यस्मिन्द्यौश्चपृथिवीचांतरिक्षमोतंमनःसहप्राणैश्चसर्वैः ॥ तमेवैकंजानथात्मानमन्यावाचोविमुंचथामृतस्यैषसेतुः ॥ ७ ॥ अराइवरथनाभौसं
हतायत्रनाड्यः ॥ सएषोंतश्चरतेबहुधाजायमानः ॥ ८ ॥ ओमित्येवंध्यायथात्मानंस्वस्तिवःपारायतमसःपरस्तात् ॥ दिव्येब्रह्मपुरेव्योम्निआ
त्मासंप्रतिष्ठितः ॥ ९ ॥ मनोमयःप्राणशरीरनेताप्रतिष्ठितोऽन्नेहृदयंसन्निधाय ॥ तद्विज्ञानेनपरिपश्यंतिधीराआनंदरूपममृतंयद्विभाति॥१०॥
भिद्यतेहृदयग्रंथिश्छिद्यंतेसर्वसंशयाः ॥ क्षीयंतेचाऽस्यकर्माणितस्मिन्दृष्टेपरावरे॥११ ॥हिरण्मयेपरेकोशेविराजंब्रह्मनिष्कलम् ॥ तच्छुभ्रंज्यो
तिषांज्योतिस्तद्यदात्मविदोविदुः ॥ १२ ॥ नतत्रसूर्योभातिनचंद्रतारकंनेमाविद्युतोभांतिकुतोऽयमग्निः ॥ तमेवभांतमनुभातिसर्वंतस्यभासास
र्वमिदंविभाति ॥ १३ ॥ ब्रह्मैवेदममृतंपुरस्ताद्ब्रह्मपश्चाद्ब्रह्मदक्षिणतश्चोत्तरेण ॥ अधश्चोर्ध्वंचप्रसृतंब्रह्मैवेदंविश्वंवरिष्ठम् ॥ १४ ॥

धीयते । भिद्यते इति ॥हृदयग्रंथिः चिदहंकारतादात्म्यरूपोभिद्यतेनश्यति॥छिद्यंतेसर्वज्ञेयविषयाःसंशयाःसर्वेषांमिथ्यात्वनिश्चयात् ॥क्षीयंतेनश्यंतिचकर्माणिप्रारब्धातिरिक्तानिसर्वा
णितस्मिन्परमात्मनिदृष्टेसाक्षात्कृतेइत्यर्थः ॥ ११ ॥ उक्तस्यैवार्थस्यसंक्षेपाभिधायकाउत्तरेत्रयोपिमंत्राः ॥ हिरण्मयंज्योतिर्मयेपरेकोशेआनंदमयेकोशेविरजम् । उपलक्षणतयागुणत्र
यरहितंब्रह्मपुच्छंप्रतिष्ठेतिश्रुत्युक्तंब्रह्मनिष्कलंमायारहितमसत्त्वमरजस्कमतमस्कममायमितिश्रुत्यंतरात् ॥ अतएवशुभ्रंस्वच्छम्॥ ज्योतिषांसर्वप्रकाशकसूर्यादीनामपिज्योतिःप्रकाशक
मित्यर्थः ॥ यदाऽऽत्मविदोज्ञानिनोमहतायासेनविदुस्तद्धिरण्मयेपरेकोशेतिष्ठतीत्यन्वयः॥१२॥कथंतज्जोतिषांज्योतिस्तदुच्यते । नतत्रेति॥तत्रतस्मिन्नात्मभूतेब्रह्मणिनसूर्योभातिसूर्यो
पितद्ब्रह्मनप्रकाशयतीत्यर्थः॥तथाचंद्रतारकम् इमाविद्युतोऽपिनभांतिनप्रकाशयंति॥कुतोऽयमग्निःपूर्वापेक्षयास्वल्पज्योतिःप्रकाशयतिनैवप्रकाशयतीत्यर्थः॥किंबहुनायदिदंजगद्भातितत्तमे
वाऽऽत्मानंस्वप्रकाशत्वाद्भांतंप्रकाशितमनुभात्यनुदीप्यतेतस्यैवभासासर्वमिदंसूर्यादिजगद्विभातीत्यर्थः॥१३॥ यन्मयोक्तंब्रह्मतदेवसत्यंरज्जुस्थानीयंनान्यज्जगत्सर्पस्थानीयंमृषात्वात्॥त
स्मादिदमेवाऽऽश्रयणीयमित्यभिप्रायेणनिगमनस्थानीयेनमंत्रेणोपसंहरति॥ब्रह्मैवेदमिति॥ब्रह्मैवोक्तलक्षणमिदंयत्पुरस्तादग्रेब्रह्मैवाऽविद्यादृष्टीनांप्रत्यवभासमानंतथापश्चाद्ब्रह्मतथादक्षिणत
श्चतथोत्तरेणतथैवाधस्तादूर्ध्वंचकिंबहुनाब्रह्मैवेदंविश्वंसमस्तंवरिष्ठमिदंजगत्॥अब्रह्मप्रत्ययःसर्वोऽविद्यामात्रोरज्ज्वामिवसर्पप्रत्ययोब्रह्मैवेदंपरमार्थसत्यमितिवेदानुशासनमित्यर्थः १४॥

एतादृशानुभववतः कृतार्थत्वमाह । एतादृगिति ॥ १५ ॥ द्वितीयादिति ॥ तदभावाद्द्वितीयस्यभयकारणस्याऽभावात्ब्रह्मविन्नबिभेतीत्यर्थः ॥ तेनममकदापिवियोगोनास्तीत्याह
नतद्वियोगइति ॥ १६ ॥ अहमेवेति ॥ अहंयाऽस्मिसासज्ञान्यस्तीत्यर्थः ॥ सज्ज्ञानीयोऽस्तिसोहमेवास्मीत्यर्थः ॥ व्यतिहारेणदृढाभेदोदर्शितः॥ १७॥ अहंज्ञानिहृदयेएवतिष्ठामीत्याह
नाहंतीर्थेइति ॥ १८ ॥ कृतकृत्यका ॥ स्वार्थेकन्प्रत्ययः ॥ १९ ॥ यस्यपुरुषस्यचेतसश्चितिपरमात्मनिलयोजातस्तेनपुरुषेणविश्वंभरापृथिवीपुण्यवतीत्यर्थः ॥ २० ॥ नातोवक्तव्य
मस्तीति ॥ इतः परमधिकोवक्तव्यांशोनास्तीत्यर्थः ॥ विद्योपदेशमात्रमुपादिशति । इदंज्येष्ठायेति ॥ २१ ॥ यथोक्तायशास्त्रोक्तलक्षणयुक्ताय ॥ गुरुप्रसादंविनापरमेश्वरप्रसा
विनाकदापिब्रह्मज्ञाविद्यानभवतीत्याह । यस्यदेवेइति ॥ श्रुतिरियम् ॥ २२ ॥ विद्येयमिति ब्रह्मविद्येत्यर्थः ॥ २३ ॥ सुकृतमुपकारंतस्यगुरोःकर्तुमयंशिष्योयतोऽसमर्थस्ततोऽयंशि
स्तस्यगुरोर्यावज्जीवपर्यंतमृऋणीत्यर्थः ॥ ब्रह्मजन्मब्रह्मरूपेणजन्म ॥ २४ ॥ पितृजातंजन्ममरणेसतिनष्टंभवेन्नेत्थंब्रह्मरूपेणजातंकदाचिदपिनष्टंभवेत्ततइत्यर्थः॥ अतएवतस्मैनद्रुह्येत्कृ

एतादृगनुभवोयस्यसकृतार्थोनरोत्तमः ॥ ब्रह्मभूतःप्रसन्नात्मानशोचतिनकांक्षति ॥ १५ ॥ द्वितीयाद्वैभयंराजंस्तदभावाद्बिभेतिन ॥ नतद्वियो
गोमेप्यस्तिमद्वियोगोपितस्यन ॥ १६ ॥ अहमेवससोऽहंवैनिश्चितंविद्धिपर्वत ॥ मद्दर्शनंतुतत्रस्याद्यत्रज्ञानीस्थितोमम ॥ १७ ॥ नाऽहंतीर्थे
नकैलासेवैकुंठेवानकर्हिचित् ॥ वसामिकिंतुमज्ज्ञानिहृदयांभोजमध्यमे ॥१८॥ मत्पूजाकोटिफलदंसकृन्मज्ज्ञानिनोऽर्चनम् ॥ कुलंपवित्रंत
स्याऽस्तिजननीकृतकृत्यका ॥ १९ ॥ विश्वंभरापुण्यवतीचिल्लयोयस्यचेतसः ॥ ब्रह्मज्ञानंतुयत्पृष्टंत्वयापर्वतसत्तम ॥ २० ॥ कथितंतन्मया
सर्वंनाऽतोवक्तव्यमस्तिहि ॥ इदंज्येष्ठायपुत्रायभक्तियुक्तायशीलिने ॥ २१ ॥ शिष्यायचयथोक्तायवक्तव्यंनाऽन्यथाक्वचित् ॥ यस्यदेवेपरा
भक्तिर्यथादेवेतथागुरौ ॥ २२ ॥ तस्यैतेकथिताह्यर्थाःप्रकाशंतेमहात्मनः ॥ येनोपदिष्टाविद्येयंसएवपरमेश्वरः ॥ २३ ॥ यस्यायंसुकृतंकर्तुम
समर्थस्ततोऋणी ॥ पित्रोरप्यधिकःप्रोक्तोब्रह्मजन्मप्रदायकः ॥ २४ ॥ पितृजातंजन्मनष्टंनेत्थंजातंकदाचन ॥ तस्मैनद्रुह्येदित्यादिनिगमोप्य
वदन्नग ॥ २५ ॥ तस्माच्छास्त्रस्यसिद्धांतोब्रह्मदातागुरुःपरः ॥ शिवेरुष्टेगुरुस्त्रातागुरौरुष्टेनशंकरः॥२६॥तस्मात्सर्वप्रयत्नेनश्रीगुरुंतोषयेन्नग ॥
कायेनमनसावाचासर्वदातत्परोभवेत्॥२७॥अन्यथातुकृतघ्नःस्यात्कृतघ्नेनास्तिनिष्कृतिः ॥ इंद्रेणाऽथर्वणायोक्ताशिरश्छेदप्रतिज्ञया ॥ २८॥

मस्यजानन्निति श्रुतिरपीममेवार्थवक्तीत्याह । तस्मैनद्रुह्येदिति ॥२५॥२६॥२७॥कृतघ्नेनास्तिनिष्कृतिरितिकृतघ्नप्रायश्चित्तंनास्तीत्यर्थः ॥ इंद्रेणाऽथर्वणायोक्तेति ॥ अत्रेदंबोध्यम् ॥ दध्य
ङ्नामाऽथर्वणोमुनिः सइंद्रंप्रतिब्रह्मविद्यां प्रार्थितवांस्तस्माइंद्रोब्रह्मविद्यांप्रोवाचाऽनंतरमुक्तवानिंद्रोयदीमांब्रह्मविद्यामन्यस्मैवदासितदैवतेशिरश्छेत्स्यामीति ॥ ततःकियताकालेनदध्य
ङ्मुनिंप्रत्यागत्याऽश्विनीकुमारौब्रह्मविद्यांप्रार्थितवंतौ ताभ्यांमुनिरुवाच यद्यहंब्रह्मविद्यांवक्ष्यामितर्हींद्रोमेशिरश्छेत्स्यतीति तच्छ्रुत्वातौवैद्यावूचतुस्तवेदंशिरच्छित्त्वाऽस्माभिरन्यत्रस्था
प्यतेअश्वीयंमस्तकंतवदेहसंयोज्यतेतेनब्रह्मविद्यामस्मभ्यमुपदिश ॥ यदेंद्रआगत्यतच्छिरश्छेत्स्यतितदावयंपूर्वस्थापितंमुख्यंशिरस्तवदेहसंयोजयावस्तदनंतरंमुख्यमुख्येनैवमुख्य
शिरसाब्रह्मविद्यांवदेतितदनंतरंसमुनिरापितथैवचकारेतिकथासर्ववेदेषुप्रसिद्धा ॥ तांकथांब्रह्मविद्यांस्तोतुंस्मारयति । इंद्रेणाऽथर्वणायोक्तेति ॥ २८ ॥

॥ २९ ॥ इतिसंकटेति ॥ एतादृश्यातिदुर्लभाब्रह्मविद्यायेनलब्धासधन्यइत्यन्वयः ॥ ३० ॥ इतिश्रीदेवीभागवततिलकेसप्तमस्कंधेदेवीगीतायांषट्त्रिंशोऽध्यायः ॥३६॥ पंचाधिकेश्चंच
त्वारिंशत्पद्यैरथसादरम्॥भक्तिस्वरूपमाहिमायथावदनुवर्ण्यते॥ १॥पूर्वंयस्यदेवपराभक्तिरित्युक्तंतत्रभक्तिस्वरूपंपृच्छति । स्वीयांभक्तिमिति॥ मध्यमस्यमध्यमाधिकारिणोविरागिणोभ
क्तिरहितस्यापिदुर्लभंज्ञानंयेनभक्तिहेतुनाजायेततांभक्तिंवदेत्यर्थः ॥१॥ मोक्षप्राप्तौत्रयोमार्गाःकर्मोपासनाज्ञानभेदेनात्रिविधाः ॥तत्रज्ञानमार्गःसाक्षान्मोक्षसाधनमितरौचित्तशुद्धिद्वारेति
विवेकः ॥तानेवमार्गान्दर्शयति । कर्मयोगइति ॥ भक्तियोगउपासनायोगइत्यर्थः॥२॥त्रयाणामपिमार्गाणांमध्येतन्मार्गगामिनांत्रयाणामपिपुरुषाणामयंभक्तियोगःकर्तुंयोग्यःशक्यश्च
भवति॥कुतइतिचेदस्यभक्तियोगस्यान्यापेक्षयासुलभत्वान्मानसत्वाद्द्रव्यशरीरायासमंतरेणकेवलंमनोवृत्त्यैवसंपाद्यत्वात् ॥ यस्मिन्भक्तियोगेकायचित्तद्रव्यव्ययादिपीडनाभावोभव
तितस्मादित्यर्थः॥तस्मात्सर्वैरप्ययंभक्तियोगोनियमेनाश्रयितव्यइत्यर्थः ॥ ३ ॥ तत्रभक्तेस्त्रैविध्यमुपदिशति । गुणभेदादिति॥मनुष्याणांमनुष्यसंबंधिनांगुणानांसत्त्वरजस्तमोरूपाणां

अश्विभ्यांकथनेतस्यशिरश्छिन्नंचवज्रिणा ॥ अश्वीयंतच्छिरोनष्टंदृष्ट्वावैद्यौसुरोत्तमौ ॥ २९ ॥ पुनःसंयोजितंस्वीयंताभ्यांमुनिशिर
स्तदा ॥ इतिसंकटसंपाद्याब्रह्मविद्यानगाधिप ॥ लब्धायेनसधन्यःस्यात्कृतकृत्यश्चभूधर ॥ ३० ॥ इति श्रीदेवीभागवतेमहापुराणेसप्त
मस्कन्धेदेवीगीतायांषड्त्रिंशोऽध्यायः ॥ ३६ ॥ हिमालयउवाच ॥ स्वीयांभक्तिंवदस्वांबयेनज्ञानंसुखेनहि ॥ जायेतमनुजस्याऽस्य
मध्यमस्याऽविरागिणः ॥ १ ॥ देव्युवाच ॥ मार्गास्त्रयोमे विख्यातामोक्षप्राप्तौनगाधिप ॥ कर्मयोगोज्ञानयोगोभक्तियोगश्चसत्तम ॥
॥ २ ॥ त्रयाणामप्ययंयोग्यःकर्तुंशक्योऽस्तिसर्वथा ॥ सुलभत्वान्मानसत्वात्कायचित्ताद्यपीडनात् ॥ ३ ॥ गुणभेदान्मनुष्याणांसाभक्ति
स्त्रिविधामता ॥ परपीडांसमुद्दिश्यदंभंकृत्वापुरःसरम् ॥ ४ ॥ मात्सर्यक्रोधयुक्तोयस्तस्यभक्तिस्तु तामसी ॥ परपीडादिरहितःस्वकल्याणा
र्थमेवच ॥ ५ ॥ नित्यंसकामोहृदयंयशोर्थीभोगलोलुपः ॥ तत्तत्फलसमावाप्त्यैमामुपास्तेऽतिभक्तितः ॥६॥ भेदबुद्ध्यातुमांस्वस्मादन्यांजाना
तिपामरः ॥ तस्यभक्तिःसमाख्यातानगाधिपतुराजसी ॥ ७ ॥ परमेशार्पणंकर्मपापसंक्षालनायच ॥ वेदोक्तत्वादवश्यंतत्कर्तव्यंतुमयाऽनिशम्
॥ ८ ॥ इतिनिश्चितबुद्धिस्तुभेदबुद्धिमुपाश्रितः ॥ करोतिप्रीतयेकर्मभक्तिःसानगसात्त्विकी ॥ ९ ॥ परभक्तेःप्रापिकेयंभेदबुद्ध्यवलंबनात् ॥
पूर्वप्रोक्तेह्युभेभक्तीनपरप्रापिकेमते ॥ १० ॥

भेदात्भक्तिरपित्रिविधा ॥ सात्त्विकराजसतामसभेदेनात्रिविधाभवतीत्यर्थः ॥ त्रिविधभक्तिस्वरूपमाह । परपीडामिति ॥ अन्यनाशार्थमित्यर्थः॥४॥५॥६॥ भेदबुद्ध्याजीवेश्वरयोर्भे
दबुद्ध्यामांसर्वेश्वरींस्वस्मादन्यांभिन्नांजानातियतःपामरः ॥७॥८॥भेदबुद्धिमुपाश्रितइति॥अयमपिसात्त्विकःपुरुषोभेदबुद्धिंजीवेश्वरयोःपृथक्त्वबुद्धिमाश्रित्यैवभक्तिंकरोतीत्यर्थः॥९॥
त्रिविधभक्तिस्वरूपमुपादिश्यतिसृणांभक्तीनांमध्येद्वयोर्हेयत्वमेकस्याग्राह्यत्वमाह । परभक्तेरिति ॥ सापरानुरक्तिरीश्वरेइतिलक्षणलक्षितायाःपरभक्तेःपरप्रेमरूपाया इयंसात्त्विकीभक्तिः
प्रापिकाभवति॥ततइयमाश्रयणीयेतिभावः॥नन्वियंपरभक्तिःकुतोनेतिचेत्तत्राह।भेदबुद्ध्यवलंबनादिति॥अस्यांभेदबुद्धिर्वर्ततइत्यात्मसदृशप्रेम्णोऽत्रासंभवान्नेयंपराभक्तिरित्यर्थः ॥ परप्रे
मात्वात्मन्येवसंभवतितदेतत्प्रेयः पुत्रात्प्रेयोवित्तात्प्रेयः सर्वस्माद्यदंतरतरामित्यादिश्रुतिभ्यः ॥ पूर्वप्रोक्तेइति ॥ पूर्वप्रोक्तेद्वेभक्तीतुनपरभक्तिप्रापिके ततस्तेउभेअपित्याज्येइत्यर्थः १०॥

परभाक्तिस्वरूपमाह । अधुनेति ॥ ११॥ तैलधारायथाव्युच्छिन्नानभवातितद्वादिदमपिचेतोध्यानमध्येविषयेषुनगच्छतीत्यर्थः ॥ १२ ॥ हेतुरिति ॥ एतादृशध्यानेहेतुःफलंकोवापिकोपि
कदाचिदपिनैवभवेत् किंतुकेवलंमत्प्रीत्यर्थंमयिपरमानुरागेणैवचेतसोनुवर्तनंकरोतीत्यर्थः॥सामीप्यादिलोकेच्छयापिनमदाराधनंकरोति किंतुप्रेम्णैवेत्याह । सामीप्येति ॥१३॥सेव्यसे
कतेति ॥ल्यब्लोपेपञ्चमी ॥ सेव्यसेवकभावंविहायेत्यर्थः ॥ मदाराधनमेवेच्छातिनमोक्षमित्यर्थः ॥ १४ ॥ स्वाभेदनैवेति ॥ अहमेवसच्चिदानंदरूपिणीभगवत्यस्मीतिभावनयेत्यर्थः
॥ १५ ॥ १६॥ १७॥ ईश्वरहेपर्वतराज भेदवर्जनात्सर्वत्रचैतन्यरूपैकैवभगवत्यस्तिनाद्वितीयेतिभेदनिरासादित्यर्थः ॥१८॥ मत्स्थामेति॥तानिचवक्ष्यमाणानिपूर्वोक्तानिचस्थानानि

अधुनापरभक्तिंतुप्रोच्यमानांनिबोधमे ॥ मद्गुणश्रवणंनित्यंममनामानुकीर्तनम् ॥ ११ ॥ कल्याणगुणरत्नानामाकरायांमयिस्थिरम् ॥ चेतसो
वर्तनंचैवतैलधारासमंसदा ॥ १२ ॥ हेतुस्तुतत्रकोवापिनकदाचिद्भवेदपि ॥ सामीप्यसार्ष्टिसायुज्यसालोक्यानांनचैषणा ॥ १३ ॥ मत्सेवा
तोऽधिकंकिंचिन्नैवजानातिकर्हिचित् ॥ सेव्यसेवकताभावात्तत्रमोक्षंनवांछति ॥ १४ ॥ परानुरक्त्यामामेवचिंतयेद्योह्यतंद्रितः॥ स्वाभेदेनैवमां
नित्यंजानातिनविभेदतः ॥ १५ ॥ मद्रूपत्वेनजीवानांचिंतनंकुरुतेतुयः ॥ यथास्वस्यात्मनिप्रीतिस्तथैवचपरात्मनि ॥ १६ ॥ चैतन्यस्य
समानत्वान्नभेदंकुरुतेतुयः ॥ सर्वत्रवर्तमानानांसर्वरूपांचसर्वदा ॥ १७ ॥ नमतेयजतेचैवाप्याचांडालांतमीश्वर ॥ नकुत्रापिद्रोहबुद्धिंकुरुतेभे
दवर्जनात् ॥ १८ ॥ मत्स्थानदर्शनश्रद्धामद्भक्तदर्शनेतथा ॥ मच्छास्त्रश्रवणेश्रद्धामंत्रतंत्रादिषुप्रभो ॥ १९ ॥ मयिप्रेमाकुलमतीरोमांचिततनुः
सदा ॥ प्रेमाश्रुजलपूर्णाक्षःकंठगद्गदनिस्वनः ॥ २० ॥ अनन्येनैवभावेनपूजयेद्योनगाधिप ॥ मामीश्वरींजगद्योनिंसर्वकारणकारणम् ॥ २१॥
व्रतानिममदिव्यानिनित्यनैमित्तिकान्यपि ॥ नित्यंयःकुरुतेभक्त्यावित्तशाठ्यविवर्जितः ॥२२॥ मदुत्सवदिदृक्षाचमदुत्सवकृतिस्तथा॥जाय
तेयस्यनियतंस्वभावादेवभूधर ॥२३॥ उच्चैर्गायंश्चनामानिममैवखलुनृत्यति ॥ अहंकारादिरहितोदेहतादात्म्यवर्जितः॥२४॥ प्रारब्धेनयथाय
च्चक्रियतेतत्तथाभवेत् ॥ नमेचिंतास्तितत्रापिदेहसंरक्षणादिषु ॥२५॥ इतिभक्तिस्तुयाप्रोक्तापरभक्तिस्तुसास्मृता ॥ यस्यांदेव्यतिरिक्तंतुनकिंचि
दपिभाव्यते॥२६॥ इत्थंजातापराभक्तिर्यस्यभूधरतत्त्वतः॥ तदैवतस्यचिन्मात्रेमद्रूपेविलयोभवेत् ॥२७॥ भक्तेस्तुयापराकाष्ठासैवज्ञानंप्रकीर्ति
तम् ॥ वैराग्यस्यचसीमासाज्ञानेतदुभयंयतः॥ २८ ॥ भक्तौकृतायांयस्यापिप्रारब्धवशतोनग ॥ नजायतेममज्ञानंमणिद्वीपंसगच्छति ॥२९॥

मच्छास्त्रंशक्तिदर्शनंतथादेवीभागवतंवेदांतंच ॥ १९ ॥ २० ॥ २१ ॥ व्रतानीति ॥ तानिवक्ष्यमाणानि ॥ २२ ॥ मदुत्सवेति ॥ तेचोत्सवावक्ष्यमाणाः ॥ अन्यकृतोत्सवदर्श
च्छाचेत्यर्थः ॥ स्वतोपिमदुत्सवकृतिर्मदुत्सवकरणमित्यर्थः ॥ २३ ॥ २४ ॥ प्रारब्धेनेति ॥ प्रारब्धाधीनंसर्वंज्ञात्वाकामपिमत्स्वरूपचिंतातिरिक्तांचिंतांनकरोतीत्यर्थः ॥ २५
॥ २६ ॥ इत्थंपरभक्त्यास्वस्वरूपेचित्तलययोग्यताभवतीत्याह । तदैवेति ॥ २७ ॥ भक्तस्त्विति ॥ यतोज्ञानेसतिभक्तिवैराग्येसांगेसंपूर्णेसिद्ध्यतस्तस्माद्भक्तेर्वैराग्यस्यचयापराकाष्ठा
साज्ञानमित्यर्थः ॥ तदुक्तंविष्णुभागवते ॥ भक्तिःपरेशानुभवोविरक्तिरन्यत्रचैषत्रिकएककालइति ॥ २८ ॥ मणिद्वीपंपूर्वोक्तंद्वादशस्कन्धेवक्ष्यमाणंच ॥ २९ ॥

ऋच्छतिप्राप्नोतीत्यर्थः ॥ ३० ॥ ३१ ॥ संवित्परतनोरितिप्रत्यगात्मविशेषणम् ॥ तस्यप्राणाइति ॥ नतस्यप्राणाउत्क्रामंतीतिश्रुतेः ॥ ३२ ॥ कंठचामीकरेति ॥ यथाकंठगतंविद्यमानमेवचामीकरंसुवर्णमज्ञानेनसुवर्णंतिरोभूतंज्ञानेनाज्ञाननाशेसतितदेवप्राप्यतेनान्यत्तद्वदेवाविद्यमानमेवात्मरूपमज्ञानेनातिरोभूतंपश्चाज्ज्ञानेनाज्ञाननाशेसतितदेवप्राप्यतेनान्यादित्यर्थः ॥ ३३ ॥ विदिताविदितादिति ॥ विदितंकार्यंघटादि ॥ अविदितंकारणंमायारूपंतस्मादन्यदित्यर्थः॥ तथाचश्रुतिः॥ अन्यदेवतद्विदितादथोअविदितादधीति॥ एतदर्थस्तुमत्कृतेकेनोपनिषद्भाष्यव्याख्यानेद्रष्टव्यः ॥ यथादर्शेप्रतिबिंबंपतातितद्वदात्मन्यस्मिन्देहेनुभवोभवतीत्यर्थः ॥ यथाजलेप्रतिबिंबंपूर्वापेक्षयाविविक्तंतथापितृलोकेनुभवोभवतीत्यर्थः ॥ ३४ ॥ ममलोकेमणिद्वीपे ॥ छायातपयोरिवात्यंतविविक्तानुभवइत्यर्थः ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ नोचेन्महान्विनाशइति ॥ तथाचश्रुतिः ॥ इहचेदवेदीदथसत्यमस्तिनचेदिहावेदीन्महती

तत्रगत्वाऽखिलान्भोगाननिच्छन्नपिचर्च्छति ॥ तदंतेममचिद्रूपज्ञानंसम्यग्भवेन्नग ॥ ३० ॥ तेनमुक्तःसदैवस्याज्ज्ञानान्मुक्तिर्नचान्यथा ॥ इहैवयस्यज्ञानं स्याद्धृद्गतप्रत्यगात्मनः ॥ ३१ ॥ ममसंवित्परतनोस्तस्यप्राणाव्रजंतिन ॥ ब्रह्मैवसंस्तदाप्नोतिब्रह्मैवब्रह्मवेदयः ॥ ३२ ॥ कंठचामीकरसममज्ञानात्तुतिरोहितम् ॥ ज्ञानादज्ञाननाशेनलब्धमेवहिलभ्यते ॥ ३३ ॥ विदिताविदितादन्यन्नगोत्तमवपुर्मम ॥ यथादर्शेतथाऽऽत्मनियथाजलेतथापितृलोके ॥ ३४ ॥ छायातपौयथास्वच्छौविविक्तौतद्वदेवहि ॥ ममलोकेभवेज्ज्ञानंद्वैतभानविवर्जितम् ॥ ३५ ॥ यस्तुवैराग्यवानेवज्ञानहीनोम्रियेतचेत् ॥ ब्रह्मलोकेवसेन्नित्यंयावत्कल्पंततःपरम् ॥ ३६ ॥ शुचीनांश्रीमतांगेहेभवेत्तस्यजनिःपुनः ॥ करोतिसाधनंपश्चात्ततोज्ञानंहिजायते ॥ ३७ ॥ अनेकजन्मभीराजञ्ज्ञानंस्यान्नैकजन्मना ॥ ततःसर्वप्रयत्नेनज्ञानार्थंयत्नमाश्रयेत् ॥ ३८॥ नोचेन्महान्विनाशःस्याज्जन्मैतद्दुर्लभंपुनः ॥ तत्राऽपिप्रथमेवर्णेवेदप्राप्तिश्चदुर्लभा ॥ ३९ ॥ शमादिषट्कसंपत्तिर्योगसिद्धिस्तथैवच ॥तथोत्तमगुरुप्राप्तिःसर्वमेवाऽत्रदुर्लभम् ॥ ४० ॥ तथेंद्रियाणांपटुतासंस्कृतत्वंतनोस्तथा ॥ अनेकजन्मपुण्यैस्तुमोक्षेच्छाजायतेततः॥४१॥साधनेसफलेप्येवंजायमानेऽपियोनरः ॥ ज्ञानार्थंनैवयततेतस्यजन्मनिरर्थकम् ॥ ४२ ॥ तस्माद्राजन्यथाशक्त्याज्ञानार्थंयत्नमाश्रयेत् ॥ पदेपदेऽश्वमेधस्यफलमाप्नोतिनिश्चितम् ॥ ४३ ॥ घृतमिवपयसिनिगूढंभूतेभूतेचवसतिविज्ञानम् ॥ सततंमंथयितव्यंमनसामंथानभूतेन ॥ ४४ ॥ ज्ञानंलब्ध्वाकृतार्थःस्यादितिवेदांतडिंडिमः ॥ सर्वमुक्तंसमासेनकिंभूयःश्रोतुमिच्छसि ॥ ४५ ॥ इतिश्रीदे०म० सप्तमस्कंधेदेवीगीतायांसप्तत्रिंशोऽध्यायः ॥ ॥ ३७ ॥ हिमालयउवाच ॥ कतिस्थानानिदेवेशिद्रष्टव्यानिमहीतले ॥ मुख्यानिचपवित्राणिदेवीप्रियतमानिच ॥ १ ॥

विनष्टिरिति ॥ प्रथमेवर्णेब्राह्मणवर्णेतत्रापिजन्मदुर्लभंतत्रापिवेदप्राप्तिर्दुर्लभा ॥ ३९ ॥ ४० ॥ संस्कृतत्वंवेदोक्तसंस्कारसंस्कृतत्वम् ॥ ४१ ॥ ४२ ॥ श्रवणादिषुप्रवृत्तस्यक्षणेक्षणेऽश्वमेधफलंभवतीत्याह । पदेपदेइतिक्षणेक्षणेइत्यर्थः ॥ ४३ ॥ उपदेशसारंभगवतीवदति । घृतमिवेति ॥ पयसिदुग्धेघृतमिवभूतेभूतेसर्वदेहेष्वित्यर्थः ॥ विज्ञानंब्रह्मवसतितिरोहितंतन्मनसामंथानभूतेनमंथयितव्यंमंथनेनपयसःसकाशात्घृतमिवपृथक्कुर्यादित्यर्थः ॥ इयमपिश्रुतिरवकंठरवेणोपात्ता ॥ ४४ ॥ उपसंहरति । सर्वमुक्तमिति ॥ ४५ ॥ इतिश्रीदेवीभागवतातिलकेसप्तमस्कंधेसप्तत्रिंशोध्यायः ॥ ३७ ॥ पंचाशद्भिरथाध्यायैःपद्यैरत्रमहोत्सवाः ॥ व्रतानिदेव्याःस्थानानिकीर्त्यंतेसंग्रहेणतु ॥ १ ॥ पूर्वमत्स्थानदर्शनश्रद्धेत्युक्तंतथाव्रतानिममादिव्यानीत्युक्तंतथामदुत्सवदिदृक्षाचमदुत्सवकृतिस्तथेत्युक्तम् ॥ तत्रतानिकानिस्थानानिव्रतानिचकानिकेतउत्सवाइत्येतत्सर्वंपृच्छति । कतिस्थानानीति ॥ १ ॥

॥ २ ॥ यस्मादहंसर्वरूपिणीतस्मात्सर्वंदृश्यमात्रंममसांविद्रूपिण्याःसर्वाधिष्ठानभूतायाःस्थानंसर्वस्यमायिकल्पितत्वात् ॥तथासर्वेऽपिकालाव्रतात्मकाः यस्मिन्कालेयद्यत्क्रियतेमत्प्रीत्य
तत्सर्वंममव्रतमेवममसर्वकालात्मकत्वात् ॥ तथाउत्सवाअपीत्यंर्थः ॥ ३ ॥ ४ ॥ कोलापुरंदक्षिणदेशे ॥ मातुःपुरंसह्याद्रिपर्वते ॥ ५ ॥ ६ ॥७ ॥ ८ ॥ चंद्रलानामदेवीकर्णाटदेशेवर्तते
॥ ९ ॥१०॥ चिंदंबरेहालास्यस्थाने ॥ ११ ॥ एकांबरंस्थानंभुवनेश्वरइतिनाम्नापुरुषोत्तमक्षेत्रसन्निधौवर्तते ॥ परशक्त्याभुवनेश्वर्याप्रतिष्ठितंतत्स्थानंतस्मिन्स्थानेपिभुवनेश्वर्यहंतिष्ठ

व्रतान्यपितथायानितुष्टिदान्युत्सवाअपि ॥ तत्सर्वंवदमेमातःकृतकृत्योयतोनरः ॥ २ ॥ श्रीदेव्युवाच ॥ सर्वदृश्यंममस्थानंसर्वेकालाव्रतात्म
काः॥उत्सवाःसर्वकालेषुयतोऽहंसर्वरूपिणी॥३॥तथापिभक्तवात्सल्यात्किंचित्किंचिदथोच्यते॥शृणुष्वाऽवहितोभूत्वानगराजवचोमम ॥४॥
कोलापुरंमहास्थानंयत्रलक्ष्मीःसदास्थिता ॥ मातुःपुरंद्वितीयंचरेणुकाधिष्ठितंपरम् ॥ ५ ॥ तुलजापुरंतृतीयंस्यात्सप्तशृंगंतथैवच ॥ हिंगुला
यामहास्थानंज्वालामुख्यास्तथैवच ॥ ६ ॥ शाकंभर्याःपरंस्थानंभ्रामर्याःस्थानमुत्तमम् ॥ श्रीरक्तदंतिकास्थानंदुर्गास्थानंतथैवच ॥७॥ विं
ध्याचलनिवासिन्याःस्थानंसर्वोत्तमोत्तमम् ॥ अन्नपूर्णामहास्थानंकांचीपुरमनुत्तमम् ॥ ८ ॥ भीमादेव्याःपरंस्थानंविमलास्थानमेवच ॥
श्रीचंद्रलामहास्थानंकौशिकीस्थानमेवच ॥ ९ ॥ नीलांबायाःपरंस्थानंनीलपर्वतमस्तके ॥ जांबूनदेश्वरीस्थानंतथाश्रीनगरंशुभम् ॥ १० ॥
गुह्यकाल्यामहास्थानंनेपालेयत्प्रतिष्ठितम् ॥ मीनाक्ष्याःपरमंस्थानंयच्चप्रोक्तंचिदंबरे ॥ ११ ॥ वेदारण्यंमहास्थानंसुन्दर्याःसमधिष्ठितम् ॥
एकांबरंमहास्थानंपरशक्त्याप्रतिष्ठितम् ॥ १२ ॥ महालसापरंस्थानंयोगेश्वर्यास्तथैवच ॥ तथानीलसरस्वत्याःस्थानंचीनेषुविश्रुतम् ॥
॥ १३ ॥ वैद्यनाथेतुबगलास्थानंसर्वोत्तमंमतम् ॥ श्रीमच्छ्रीभुवनेश्वर्यामणिद्वीपंममस्मृतम् ॥ १४ ॥ श्रीमत्त्रिपुरभैरव्याःकामाख्यायोनिमं
डलम् ॥ भूमंडलेक्षेत्ररत्नंमहामायाधिवासितम् ॥ १५॥ नातःपरतरंस्थानंक्वचिदस्तिधरातले ॥ प्रतिमासंभवेद्देवीयत्रसाक्षाद्रजस्वला ॥
॥ १६ ॥ तत्रत्यादेवताःसर्वाःपर्वतात्मकतांगताः ॥ पर्वतेषुवसंत्येवमहत्योदेवताअपि ॥ १७ ॥ तत्रत्यापृथिवीसर्वादेवीरूपास्मृताबुधैः ॥
नातःपरतरंस्थानंकामाख्यायोनिमंडलात्॥१८॥गायत्र्याश्चपरंस्थानंश्रीमत्पुष्करमीरितम् ॥ अमरेशेचंडिकास्यात्प्रभासेपुष्करेक्षिणी॥१९॥
नैमिषेतुमहास्थानेदेवीसालिङ्गधारिणी ॥ पुरुहूतापुष्कराक्षेअषाढौचरतिस्तथा ॥ २० ॥ चंडमुंडीमहास्थानेदंडिनीपरमेश्वरी ॥ भारभूतौभ
वेद्भूतिर्नाकुलेनकुलेश्वरी ॥ २१ ॥

मीत्यर्थः ॥ १२ ॥ महालसास्थानंदक्षिणदेशेमल्लारिस्थानमितिप्रसिद्धंतदस्ति योगेश्वरीस्थानंवराटदेशेऽस्ति ॥ चीनेषुचीनदेशेषु ॥१३॥ माणिद्वीपंतृतीयस्कंधेवर्णितंतन्ममभुवनेश्वर्य
स्मृतमित्यर्थः ॥१४॥ कामाख्यायायामहादेव्याःसतीदेहेनावतीर्णायायोनिमंडलंयत्रपतितंकामरुदेशेकालिकापुराणेयस्यमहद्वर्णनंतत्कामाख्यायोनिमंडलंत्रिपुरभैरव्याःस्थानमित्यर्थः
तस्यमाहिमानंवर्णयति।भूमंडलेइति॥ १५॥रजस्वलारजोवतीएतादृशंतज्जागृतंस्थानमित्यर्थः ॥१६॥पर्वतात्मकतांगताइति॥कालिकापुराणेसर्वमेतत्स्पष्टम् ॥१७॥१८॥१९॥२०॥२१

॥ २२ ॥ महाकालेउज्जयिन्याम् ॥ मध्यमाभिधेमध्यमेश्वरस्थाने ॥ २३ ॥ नाकुलेस्थानेस्वायंभुवीदेवीवर्ततेइत्यर्थः ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ छगलंडके इदंस्थानंदाक्षिणदेशे समुद्रसन्निधौतिष्ठति ॥ २८ ॥ २९ ॥ हृल्लेखापदव्युत्पत्तिर्यामलेभुवनेश्वरीरहस्ये ॥ हृदिलेखेवजागर्तिप्राणशक्तिरियंपरा । हृल्लेखाकथ्यतेतस्मादिति ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ व्रतमनंततृतीयाख्यमिति ॥ इमानितृतीयाव्रतानिमत्स्यपुराणेप्रसिद्धानि ॥ तद्विधिश्चतत्रैवोक्तः ॥ ३७ ॥ ३८ ॥ यत्रप्रदोषकाले ॥ ३९ ॥ निशामुखेरज

चंद्रिकातुहरिश्चंद्रेश्रीगिरौशांकरीस्मृता ॥ जप्येश्वरेत्रिशूलास्यात्सूक्ष्माचाम्रातकेश्वरे ॥ २२ ॥ शांकरीतुमहाकालेशर्वाणीमध्यमाभिधे ॥ केदाराख्येमहाक्षेत्रेदेवीसामार्गदायिनी ॥२३॥ भैरवाख्येभैरवीसागयायांमंगलास्मृता ॥ स्थाणुप्रियाकुरुक्षेत्रेस्वायंभुव्यपिनाकुले ॥२४॥ कनखलेभवेदुग्राविश्वेशाविमलेश्वरे ॥ अट्टहासेमहानंदामहेंद्रेतुमहांतका ॥२५॥ भीमेभीमेश्वरीप्रोक्तास्थानेवस्त्रापथेपुनः॥ भवानीशांकरीप्रोक्तारुद्राणीत्वर्धकोटिके ॥ २६ ॥ अविमुक्तेविशालाक्षीमहाभागामहालये ॥ गोकर्णेभद्रकर्णीस्याद्भद्रास्याद्भद्रकर्णके ॥२७॥ उत्पलाक्षीसुवर्णाक्षेस्थाण्वीशास्थाणुसंज्ञिके ॥ कमलालयेतुकमलाप्रचंडाछगलंडके ॥ २८ ॥ कुरंडलेत्रिसंध्यास्यान्माकोटेमुकुटेश्वरी ॥ मंडलेशेशांडकीस्यात्कालीकालंजरेपुनः ॥ २९ ॥ शंकुकर्णेध्वनिःप्रोक्तास्थूलास्यात्स्थूलकेश्वरे ॥ ज्ञानिनांहृदयांभोजेहृल्लेखापरमेश्वरी ॥ ३० ॥ प्रोक्तानीमानिस्थानानिदेव्याःप्रियतमानिच ॥ तत्तत्क्षेत्रस्यमाहात्म्यंश्रुत्वापूर्वंनगोत्तम ॥ ३१ ॥ तदुक्तेनविधानेनपश्चाद्देवींप्रपूजयेत् ॥ अथवासर्वक्षेत्राणिकाश्यांसंतिनगोत्तम ॥ ३२ ॥ तत्रनित्यंवसेन्नित्यंदेवीभक्तिपरायणः ॥ तानिस्थानानिसंपश्यञ्जपन्देवींनिरंतरम् ॥ ३३ ॥ ध्यायंस्तच्चरणांभोजंमुक्तोभवतिबंधनात् ॥ इमानिदेवीनामानिप्रातरुत्थाययःपठेत् ॥ ३४ ॥ भस्मीभवंतिपापानितत्क्षणान्नगसत्वरम् ॥ श्राद्धकालेपठेदेतान्यमलानिद्विजाग्रतः ॥ ३५ ॥ मुक्तास्ततिपतरःसर्वेप्रयांतिपरमांगतिम् ॥ अधुनाकथयिष्यामिव्रतानितवसुव्रत ॥ ३६ ॥ नारीभिश्चनरैश्चैवकर्तव्यानिप्रयत्नतः ॥ व्रतमनंततृतीयाख्यंरसकल्याणिनीव्रतम् ॥ ३७ ॥ आर्द्रानंदकरंनाम्नातृतीयायाव्रतंचयत् ॥ शुक्रवारव्रतंचैवतथाकृष्णचतुर्दशी ॥ ३८ ॥ भौमवारव्रतंचैवप्रदोषव्रतमेवच ॥ यत्रदेवोमहादेवोदेवींसंस्थाप्यविष्टरे ॥ ३९ ॥ नृत्यंकरोतिपुरतःसार्धंदेवैर्निशामुखे ॥ तत्रोपोष्यरजन्यादौप्रदोषेपूजयेच्छिवाम् ॥ ४० ॥ प्रतिपक्षंविशेषेणतद्देवीप्रीतिकारकम् ॥ सोमवारव्रतंचैवममाऽतिप्रियकृन्नग ॥ ४१ ॥ तत्रापिदेवींसंपूज्यरात्रौभोजनमाचरेत् ॥ नवरात्रद्वयंचैवव्रतंप्रीतिकरंमम ॥ ४२ ॥ एवमन्यान्यपिविभोनित्यनैमित्तिकानिच ॥ व्रतानिकुरुतेयोवैमत्प्रीत्यर्थंविमत्सरः ॥ ४३ ॥ प्राप्नोतिममसायुज्यंसमेभक्तःसमेप्रियः ॥ उत्सवानपिकुर्वीतदोलोत्सवमुखान्विभो ॥ ४४ ॥

नीमुखे तस्मात्प्रदोषव्रतंदेव्याःशिवस्यचसिद्धम् ॥ ४० ॥ ४१ ॥ नवरात्रद्वयंचैवेति ॥ तच्चशारदंवासंतिकंच ॥ चकारेणपूर्वोक्तमपिमाघापाढस्थंनवरात्रद्वयंग्राह्यम् ॥४२॥ एवमन्यान्यपीति ॥ अन्यान्यप्युपांगललितान्नतादीनिव्रतानि पुराणांतरेषुतंत्रांतरेष्वप्युक्तानीत्यर्थः ॥४३॥ दोलोत्सवमुखानिति ॥ तद्विधिश्चतत्रैवोक्तः॥ देवीपुराणे चैत्रशुक्लतृतीयायांकुर्याद्दोलोत्सवंबुधः ॥ तृतीयायांयजेद्देवींशंकरेणसमन्विताम् ॥ कुंकुमागुरुकर्पूरमणिवस्त्रसुगंधकैः ॥ स्रग्गंधधूपदीपैश्चदमनेनविशेषतः ॥ आंदोलयेत्ततोवत्सशिवोमातुष्ट्येसदेति ॥ ४४ ॥

शयनोत्सवमिति ॥ तत्कालश्चवामनपुराणेउक्तः ॥ आषाढेपौर्णमासीतउत्तरायातृतीयातद्रूपः ॥ तथाजागरणोत्सवकालश्चकार्तिकपौर्णमासीतउत्तरायातृतीयातद्रूपः ॥ शयनोत्स
विधिर्जागरणोत्सवविधिश्चसर्वदेवतासुसमानः ॥ देवताभेदेनतुकालभेदएवकेवलंभिन्नः सर्वंचेदंवामनपुराणेस्पष्टम् ॥ रथोत्सवमिति ॥ तद्विधिश्चोमासंहितायांशिवपुराणे ॥आषाढशु
पक्षीयतृतीयायांरथोत्सवम् ॥ देव्याःप्रियतमंकुर्याद्यथावित्तानुसारतः ॥ रथंपृथ्वींविजानीयाद्रथांगेचंद्रभास्करौ ॥ वेदानश्वान्विजानीयात्सारथिंपद्मसंभवम् ॥ नानामणिगणाकी
पुष्पमालाविराजितम् ॥ एवंरथंकल्पयित्वातस्मिन्संस्थापयेच्छिवाम् ॥ लोकसंरक्षणार्थायलोकान्द्रष्टुंपरांबिका ॥ रथमध्येसंस्थितेतिभावयेन्मातिमान्नरः ॥ रथेप्रचलितेमंदंजयश
मुदीरयेत् ॥ पाहिदेविजनानस्मान्प्रपन्नान्दीनवत्सले ॥ इतिवाक्यैस्तोषयेच्चनानावादित्रनिःस्वनैः ॥ सीमांतेतुरथंनीत्वातत्रसंपूजयेद्रथे ॥ नानास्तोत्रैस्ततःस्तुत्वाप्यानयेत्तांस्ववेश
नीति ॥ दमनोत्सवश्चैत्रपौर्णमास्याम् ॥ तद्विधिश्चधर्मशास्त्रेतंत्रेषुचप्रसिद्धएव ॥ ४५ ॥ पवित्रोत्सवमिति ॥ सचश्रावणपौर्णमास्याम् ॥ तद्विधिश्चधर्मशास्त्रेतंत्रेचप्रसिद्धएव ॥ ४६
॥४७॥ सुमादिभिःकुसुमादिभिरेतान्कुमारीबटुकब्राह्मणान्पूजयेदित्यर्थः ॥४८॥४९॥ इतिश्रीदेवीभागवततिलकेसप्तमस्कंधेदेवीगीतायामष्टात्रिंशोऽध्यायः ॥३८॥ सप्ताधिकेश्चचत्वा

शयनोत्सवंयथाकुर्यात्तथाजागरणोत्सवम् ॥ रथोत्सवंचमेकुर्याद्दमनोत्सवमेवच ॥४५॥ पवित्रोत्सवमेवापिश्रावणेप्रीतिकारकम् ॥ ममभक्तः
सदाकुर्यादेवमन्यान्महोत्सवान् ॥ ४६ ॥ मद्भक्तान्भोजयेत्प्रीत्यातथाचैवसुवासिनीः ॥ कुमारीर्बटुकांश्चापिमद्बुद्ध्यातद्गतांतरः ॥ ४७ ॥
वित्तशाठ्येनरहितोयजेदेतान्सुमादिभिः ॥ यएवंकुरुतेभक्त्याप्रतिवर्षमतंद्रितः ॥ ४८ ॥ सधन्यःकृतकृत्योऽसौमत्प्रीतेःपात्रमंजसा ॥ सर्वमु
क्तंसमासेनममप्रीतिप्रदायकम् ॥ नाऽशिष्यायप्रदातव्यंनाऽभक्तायकदाचन ॥ ४९ ॥ इतिश्रीदेवीभागवतेमहापुराणेस० देवीगीतायामष्टत्रिंशो
ऽध्यायः॥ ३८ ॥ हिमालयउवाच ॥ देवदेविमहेशानिकरुणासागरेंबिके ॥ ब्रूहिपूजाविधिंसम्यग्यथावदधुनानिजम् ॥ १ ॥ श्रीदेव्युवाच ॥
वक्ष्येपूजाविधिंराजन्नंबिकायायथाप्रियम् ॥ अत्यंतश्रद्धयासार्धंशृणुपर्वतपुंगव ॥ २ ॥ द्विविधाममपूजास्याद्बाह्याचाऽऽभ्यंतराऽपिच ॥ बा
ह्याऽपिद्विविधाप्रोक्तावैदिकीतांत्रिकीतथा ॥ ३ ॥ वैदिक्यर्चाऽपिद्विविधामूर्तिभेदेनभूधर ॥ वैदिकीवैदिकैःकार्यावेददीक्षासमन्वितैः ॥ ४ ॥
तंत्रोक्तदीक्षावद्भिस्तुतांत्रिकीसंश्रिताभवेत् ॥ इत्थंपूजारहस्यंचनज्ञात्वाविपरीतकम् ॥ ५ ॥

शत्पद्यैरथपूजनम् ॥ भगवत्याःकथ्यतेत्रयेनदेवीप्रसीदतिं॥१॥पूर्वंबहुषुस्थलेषुपूजायामहिमानंश्रुत्वापूजाविधिंपृच्छति । देवदेवीति ॥१॥२॥३॥ मूर्तिभेदेनवक्ष्यमाणेन ॥ वेदोक्त
क्षासमन्वितैर्वैदिकैः ॥ वैदिकीवेदोक्तप्रकारापूजाकर्तव्येत्यर्थः ॥ साचविराट्स्वरूपस्यपूर्वंदेव्यादर्शितस्यध्यानरूपाप्रथमा ॥ द्वितीयातुकरचरणादिविशिष्टांसुकुमारांभगवतीमूर्तिंध
त्वावेदोक्तमंत्रैरावाहनादिविसर्जनांतंकुर्य्यादितिद्वितीयापूजा ॥ इत्येवंमूर्तिभेदेनवैदिकीपूजाद्विविधेत्यर्थः ॥ ४ ॥ तांत्रिक्याअधिकारिणमाह ॥ तंत्रोक्तेति ॥ कुंडमंडपादिपुरःसरं
त्रिकमंत्रैर्दीक्षांकुर्वद्भिस्तांत्रिकीतंत्रोक्तविधिनापूजाकर्तव्येत्यर्थः ॥ नज्ञात्वेति ॥ यस्ययस्यांपूजायामधिकारस्तत्रतंनज्ञात्वेत्यर्थः ॥ विपरीतकंवैदिकस्तांत्रिकंकरोतितांत्रिकोवैदिक
रोतीत्येवंरूपंयःकरोतिमूढः सपतत्येवनरकादिष्वितिशेषः ॥ तथाचश्रुतिः । योवैस्वांदेवतामतियजतेनस्वायैदेवतायैच्यवतेनपरांप्राप्नोतिपापीयान्भवतीति । अतियजतेत्यजाति
च्यवतेगृह्णाति । स्वांदेवतामिति । स्वोचितमार्गोपलक्षणम् ॥ ५ ॥

तत्रवैदिक्यर्चायाएवस्वरूपंप्राशस्त्यंचवदति । तत्रयावैदिकीति ॥ प्रथमामिति ॥ वैदिकीतांत्रिकीतथेतिवाक्योक्तांप्रथमांवैदिकीमित्यर्थः ॥६॥७॥८॥ शांत्यादियुक्तोवैदिकींपूजां कुर्यादित्याह । शांतःसमाहितइति ॥ ९ ॥ तत्परस्तन्ममविराट्स्वरूपमेवपरमुत्कृष्टंयस्यसतत्परः ॥ १० ॥ मामेवविराट्स्वरूपाम् ॥ ११ ॥ १२ ॥ १३ ॥ ननुतर्हिकेवलंकर्मनिरर्थकमितिचेन्नेत्याह॥धर्मात्संजायतेभक्तिरिति ॥ यदिकर्मनाचरितंतदापापक्षयाभावाद्भक्तिरेवदुर्लभास्यात्॥भक्तेरभावाच्चपरंब्रह्माप्यत्यंतंदुर्लभंस्यादितिकर्माचरणंसार्थकमेवेतिभावः ॥ परामिति ॥ ज्ञानमित्यर्थः ॥१४॥ तच्चकर्मनान्यशास्त्रोदितम् ॥ किंतुवेदोक्तमेवेत्याह । श्रुतिस्मृतिभ्यामुदितामिति ॥ यदुदितंकर्मसधर्मइत्यर्थः ॥ १५ ॥ किमितिवेदोक्तएवधर्मोनान्यशास्त्रोदितइतिचेत्तत्राह।सर्वज्ञादिति॥ सर्वज्ञात्सर्वशक्तेर्मत्तोमत्स्वरूपाद्वेदःसमुत्थितःतदाममाज्ञानाभावाद्यन्मयोक्तंतत्सत्यमेवेतिश्रुतिर्नाऽप्रमाणम् । वेदातिरिक्तशास्त्राणित्वज्ञपुरुषबुद्धि

करोतियोनरोमूढःसपतत्येवसर्वथा ॥ तत्रयावैदिकीप्रोक्ताप्रथमातांवदाम्यहम् ॥ ६ ॥ यन्मेसाक्षात्परंरूपंदृष्टवानसिभूधर ॥ अनंतशीर्षनयनमनंतचरणंमहत् ॥ ७ ॥ सर्वशक्तिसमायुक्तंप्रेरकंयत्परात्परम् ॥ तदेवपूजयेन्नित्यंनमेद्ध्यायेत्स्मरेदपि॥८॥इत्येतत्प्रथमाचार्याःस्वरूपंकथितंनग ॥ शांतः समाहितमनादंभाहंकारवर्जितः ॥ ९ ॥ तत्परोभवतद्याजीतदेवशरणंव्रज ॥ तदेवचेतसापश्यजपध्यायस्वसर्वदा॥१०॥अनन्ययाप्रेमयुक्तभक्त्यामद्भावमाश्रितः ॥ यज्ञैर्यजतपोदानैर्मामेवपरितोषय॥११॥इत्थंममाऽनुग्रहतोमोक्ष्यसेभवबंधनात्॥मत्परायेमदासक्तचिताभक्तवरामताः॥१२॥प्रतिजानेभवादस्मादुद्धराम्यचिरेणतु॥ध्यानेनकर्मयुक्तेनभक्तिज्ञानेनवापुनः ॥१३॥ प्राप्याऽहंसर्वथाराजन्नतुकेवलकर्मभिः॥ धर्मात्संजायतेभक्तिर्भक्त्या संजायतेपरम् ॥ १४॥श्रुतिस्मृतिभ्यामुदितंयत्सधर्मःप्रकीर्तितः॥अन्यशास्त्रेणयःप्रोक्तोधर्माभासःसउच्यते॥१५॥ सर्वज्ञात्सर्वशक्तेश्चमत्तोवेदःसमुत्थितः ॥ अज्ञानस्यममाऽभावादप्रमाणानचश्रुतिः ॥ १६ ॥ स्मृतयश्चश्रुतेरर्थंगृहीत्वैवचनिर्गताः ॥ मन्वादीनांश्रुतीनांचततःप्रामाण्यमिष्यते ॥ १७ ॥ क्वचित्कदाचित्तंत्रार्थकटाक्षेणपरोदितम् ॥ धर्मंवदंतिसोंशस्तुनैवग्राह्योऽस्तिवैदिकैः ॥ १८ ॥ अन्येषांशास्त्रकर्तॄणामज्ञानप्रभवत्वतः ॥ अज्ञानदोषदुष्टत्वात्तदुक्तेर्नप्रमाणता ॥१९॥ तस्मान्मुमुक्षुधर्मार्थंसर्वथावेदमाश्रयेत् ॥ राजाज्ञाचयथालोकेहन्यतेनकदाचन ॥ २० ॥ सर्वेशान्याममाज्ञासाश्रुतिस्त्याज्याकथंनृभिः ॥ मदाज्ञारक्षणार्थंतुब्रह्मक्षत्रियजातयः ॥ २१ ॥

कल्पितानिततश्चाज्ञप्रणीतत्वादप्रमाणान्येवेतितदुक्तोधर्मोधर्माभासःवेदोक्तएवतुधर्मइत्यर्थः॥१६॥ननुमन्वादिस्मृतीनामप्येवंरीत्याप्रामाण्याभावआगतइतिचेत्तत्राह । स्मृतयश्चेति ॥ श्रुत्यर्थएवतुस्मृतिभिरुच्यतेततोमूलभूतश्रुतेःप्रामाण्यात्तन्मूलकस्मृतीनामपिप्रामाण्यमव्याहतमेवेत्यर्थः ॥१७॥ ननुमन्वादिस्मृतीनांपुराणानांचसप्रमाणत्वेतप्तमुद्राविधानवामाचारादिवेदविरुद्धाचारस्यचपुराणस्मृतिषुसत्वात्ग्राह्यत्वंस्यादितिचेत्तत्राह।क्वचित्कदाचिदिति॥तंत्रार्थकटाक्षेणतंत्रतंत्राथावलोकनेनपरोदितंवेदातिरिक्तशास्त्रोदितमपिधर्मंवदंति सधर्मःप्रत्यक्षश्रुतिरुद्धत्वात्तैरुक्तोपिनवैदिकैर्ग्राह्यइत्यर्थः॥१८॥तत्रहेतुमाह । अन्येषांशास्त्रकर्तॄणामिति॥ १९॥२०॥सर्वेशान्याःसर्वैश्वर्यांममसाश्रुतिराज्ञास्तिसानृभिःकथंत्याज्येत्यर्थः ॥ तथाचकूर्मपुराणेदेवीवाक्यंद्वादशाध्याये॥ममैवाज्ञापराशक्तिर्वेदसंज्ञापुरातनी॥ऋग्यजुःसामरूपेणसर्गादौसंप्रवर्ततइति ममाज्ञाभूतश्रुतिरक्षणार्थंमयामहान्यत्नःकृतोस्तीत्याह॥ मदाज्ञेति ॥२१॥

ततस्तस्माद्धेतोर्ज्ञेयंश्रुतेर्वचोमेममरहस्यमस्तीति ॥२२॥ वेषानशाकंभर्यादिरामकृष्णाद्यवतारान्॥अतएवेति ॥ वेदसंरक्षकादेवास्तन्नाशकादैत्याइतिविभागोवेदसद्भावादेवजातइनोत्स
॥ २३ ॥ २४ ॥ २५ ॥ ननुतर्हिकिमर्थंतंत्राणिशिवेनप्रणीतानीतिचेत्तत्राह।अन्यानियानीति ॥ २६ ॥ तेषांनामान्याह । वामंकापालिकमिति ॥ २७ ॥ पापिनांवेदधर्माचरणेसद्गांत
स्यादितिकर्मवैचित्र्याभावात्प्रपंचवैचित्र्यं नस्यादितितेषांनानाफलप्रदर्शनेनतत्रप्रवृत्तयेमोहार्थमेववेदश्रद्धाप्रच्युत्यर्थंचतंत्राणिप्रणीतानीत्यर्थः ॥ किंचशापदग्धानांवेदबहिष्कृतानांब्राह्म
णानांसोपानक्रमेणजन्मांतरेवेदाधिकारप्राप्त्यर्थंकिंचित्परमेश्वरोपासनंवक्तव्यमितितदनुग्रहार्थंचतंत्राणिप्रणीतानीत्याह । दक्षशापादिति ॥ शापकथाचकूर्मपुराणेसूतसंहितायामस्मि
न्द्वादशस्कंधेचप्रसिद्धापुराणांतरेषुच ॥ २८ ॥ २९ ॥ ३० ॥ ननुतर्हितंत्राणिसर्वथात्याज्यानीतिपर्यवसन्नमितिचेन्नेत्याह । तत्रवेदाविरुद्धांशइति॥तंत्रेषुद्विविधोंशोस्ति ॥ एकोवेदवि

मयासृष्टास्ततोज्ञेयंरहस्यंमेश्रुतेर्वचः ॥ यदायदाहिधर्मस्यग्लानिर्भवतिभूधर ॥ २२ ॥ अभ्युत्थानमधर्मस्यतदावेषान्बिभर्म्यहम् ॥ देव
दैत्यविभागश्चाऽप्यतएवाऽभवन्नृप ॥ २३ ॥ येनकुर्वंतितद्धर्मंतच्छिक्षार्थंमयासदा ॥ संपादितास्तुनरकास्त्रासोयच्छ्रवणाद्भवेत् ॥ २४ ॥
योवेदधर्ममुज्झित्यधर्ममन्यंसमाश्रयेत् ॥ राजाप्रवासयेद्देशान्निजादेतानधर्मिणः ॥ २५ ॥ ब्राह्मणैर्नचसंभाष्याःपंक्तिग्राह्यानचद्विजैः ॥ अन्या
नियानिशास्त्राणिलोकेस्मिन्विविधानिच ॥ २६ ॥ श्रुतिस्मृतिविरुद्धानितामसान्येवसर्वशः ॥ वामंकापालकंचैवकौलकंभैरवागमः ॥ २७ ॥
शिवेनमोहनार्थायप्रणीतोनान्यहेतुकः ॥ दक्षशापाद्भृगोःशापाद्दधीचस्यचशापतः ॥ २८ ॥ दग्धायेब्राह्मणवरावेदमार्गबहिष्कृताः ॥
तेषामुद्धरणार्थायसोपानक्रमतःसदा ॥ २९ ॥ शैवाश्चवैष्णवाश्चैवसौराःशाक्तास्तथैवच ॥ गाणपत्याआगमाश्चप्रणीताःशंकरेणतु ॥ ३० ॥
तत्रवेदाविरुद्धांशोप्युक्तएवक्वचित्क्वचित् ॥ वैदिकैस्तद्ग्रहेदोषोनभवत्येवकर्हिचित् ॥ ३१ ॥ सर्वथावेदभिन्नार्थेनाधिकारीद्विजोभवेत् ॥ वेदा
धिकारहीनस्तुभवेत्तत्राधिकारवान् ॥ ३२ ॥ तस्मात्सर्वप्रयत्नेनवैदिकोवेदमाश्रयेत् ॥ धर्मेणसहितंज्ञानंपरंब्रह्मप्रकाशयेत् ॥ ३३ ॥ सर्वैषणाः
परित्यज्यमामेवशरणंगताः ॥ सर्वभूतदयावंतोमानाहंकारवर्जिताः ॥ ३४ ॥ मच्चित्तामद्गतप्राणामत्स्थानकथनेरताः ॥ संन्यासिनोवनस्था
श्चगृहस्थाब्रह्मचारिणः॥ ३५ ॥ उपासंतेसदाभक्त्यायोगमैश्वरसंज्ञितम् ॥ तेषांनित्याभियुक्तानामहमज्ञानजंतमः ॥३६॥ ज्ञानसूर्यप्रकाशेनना
शयामिनसंशयः ॥ इत्थंवैदिकपूजायाःप्रथमायानगाधिप ॥ ३७ ॥

रुद्धोद्वितीयोवेदाविरुद्धः ॥ तत्रवैदिकैर्वेदविरुद्धांशस्त्याज्योवेदाविरुद्धांशस्तुग्राह्यइत्यर्थः ॥ तदुक्तंवायुसंहितायाम् ॥ शैवागमोपिद्विविधःश्रौताश्रौतश्चतन्मयः ॥ श्रुतिसारमयःश्रौत
स्वतंत्रइतरोमतइत्यादि॥श्रौतोग्राह्यस्तुवैदिकैरितिसूतसंहितायाम् ॥ तथापियोंशोमार्गाणां वेदेननविरुद्ध्यते ॥ सोंशः प्रमाणमित्युक्तमिति ॥ इत्थमेतावत्पर्यंतंवैदिकंमतमुपपादि
तम्॥तंत्राणांस्वतःप्रामाण्यमंगीकुर्वतांतांत्रिकाणांमतंत्वन्यदेवेतिदिक् ॥ ३१ ॥ ३२ ॥ यस्माद्वेदोक्तएवधर्मस्तस्माद्वेदमेवाश्रयेदित्याह । तस्मादिति ॥ धर्मेणवेदोक्तेन ॥३३॥ पु
र्विराट्स्वरूपोपासकस्यनिष्ठामाह । सर्वैषणाइति ॥ ३४ ॥ ३५ ॥ ऐश्वरसंज्ञितंविराट्स्वरूपोपासनाभिधम् ॥ ३६ ॥ प्रथमवैदिकपूजास्वरूपकथनमुपसंहरति इत्थमिति ॥ ३७ ॥

वेदमार्गेणकरचरणादिविशिष्टसुकुमारमूर्तिपूजारूपायाद्वितीयवैदिकपूजायाःस्वरूपमाह । द्वितीयायाइति ॥ ३८ ॥ महापटेवस्त्रे ॥ ३९ ॥ सुकुमारांमूर्तिमाह । सगुणामिति॥४०॥ ॥४१॥४२॥ इत्थंबाह्यपूजाकियत्कालपर्यंतंकर्तव्येतिचेत्तत्राह । यावदांतरेति ॥ आंतरपूजायामधिकारेजातइत्यर्थः ॥ तदुक्तंसूतसंहितायांपंचमाध्यायेशक्तिपूजाप्रकरणे ॥ अथाभ्यंतरपूजायामधिकारोभवेद्यदि ॥ त्यक्त्वाबाह्यामिमांपूजामाश्रयेदपरांबुधइति ॥ ४३ ॥ आंतरपूजास्वरूपमाह । आभ्यंतरेति ॥ संविदिज्ञानरूपेब्रह्मणिमयियच्चेतसोलयस्तद्रूपेइत्यर्थः ॥ ४४ ॥ ४५ ॥ निर्मनस्केननिर्विकल्पेन ॥ योगयुक्तेनभक्तियोगयुक्तेन ॥ ४६ ॥ इयंयामूर्तौपूजासंक्षेपेणोक्तातांविस्तरेणवक्तुंप्रतिजानीते । अतःपरमिति ॥ ४७ ॥ इतिश्रीदेवीभागवततिलकेसप्तमस्कन्धेदेवीगीतायामेकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥ पञ्चाधिकैश्चचत्वारिंशद्भिःपद्यैरतःपरम् ॥ बाह्यपूजाविधानंचयथावदभिधीयते ॥ १ ॥ बाह्यपूजांवक्तुमुप

स्वरूपमुक्तंसंक्षेपाद्द्वितीयायाअथोब्रुवे ॥ मूर्तौवास्थंडिलेवापितथासूर्येंदुमंडले ॥३८॥ जलेऽथवाबाणलिंगेयंत्रेवाऽपिमहापटे॥ तथाश्रीहृदयांभोजेध्यात्वादेवींपरात्पराम् ॥३९ ॥ सगुणांकरुणापूर्णांतरुणीमरुणारुणाम् ॥ सौंदर्यसारसीमांतांसर्वावयवसुंदराम् ॥ ४० ॥ शृंगाररससंपूर्णांसदाभक्तार्तिकातराम् ॥ प्रसादसुमुखीमंबांचंद्रखंडशिखंडिनीम् ॥ ४१ ॥ पाशांकुशवराभीतिधरामानंदरूपिणीम् ॥ पूजयेदुपचारैश्चयथावित्तानुसारतः ॥ ४२ ॥ यावदांतरपूजायामधिकारोभवेन्नहि ॥ तावद्बाह्यामिमांपूजांश्रयेज्जातेतुतांत्यजेत् ॥ ४३ ॥ आभ्यंतरातुयापूजासातुसंविल्लयःस्मृतः ॥ संविदेवपरंरूपमुपाधिरहितंमम ॥ ४४ ॥ अतःसंविदिमद्रूपेचेतःस्थाप्यंनिराश्रयम् ॥ संविद्रूपातिरिक्तंतुमिथ्यामायामयंजगत् ॥ ४५ ॥ अतःसंसारनाशायसाक्षिणीमात्मरूपिणीम् ॥ भावयेन्निर्मनस्केनयोगयुक्तेनचेतसा ॥ ४६ ॥ अतःपरंबाह्यपूजाविस्तारःकथ्यतेमया ॥ सावधानेनमनसाशृणुपर्वतसत्तम ॥ ४७ ॥ इति श्रीदेवीभागवतेमहापुराणे सप्तमस्कन्धे देवीगीतायामेकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥ श्रीदेव्युवाच ॥ प्रातरुत्थायशिरसिसंस्मरेत्पद्ममुज्ज्वलम् ॥ कर्पूराभंस्मरेत्तत्रश्रीगुरुंनिजरूपिणम् ॥ १ ॥ सुप्रसन्नंलसद्भूषाभूषितंशक्तिसंयुतम् ॥ नमस्कृत्यततोदेवींकुंडलींसंस्मरेद्बुधः ॥ २ ॥ प्रकाशमानांप्रथमेप्रमाणेप्रतिप्रमाणेऽप्यमृतायमानाम् ॥ अंतःपदव्यामनुसंचरंतीमानंदरूपामबलांप्रपद्ये ॥ ३ ॥ ध्यात्वैवंतच्छिखामध्येसच्चिदानंदरूपिणीम् ॥ मांध्यायेदथशौचादिक्रियाःसर्वाःसमापयेत् ॥४ ॥ अग्निहोत्रंततोहुत्वामत्प्रीत्यर्थंद्विजोत्तमः ॥ होमांतेस्वासनेस्थित्वापूजासंकल्पमाचरेत् ॥ ५ ॥

क्रमते प्रातरुत्थायेति ॥ अष्टपंचभवेत्प्रातरितिधर्मशास्त्रोक्तप्रातःकालेइत्यर्थः ॥ शिरसिस्वमस्तके ब्रह्मरंध्रे पद्मंसहस्रारम् ॥ तत्रतस्मिन्पद्मेनिजरूपिणांनिजगुरुसमानाकारमित्यर्थः ॥ ॥ १ ॥ शक्तिसंयुतंस्वपत्नीसंयुतम् ॥ माताएवगुरुश्चेत्तांपतिसंयुतांध्यायेत् ॥ २ ॥ प्रकाशमानामिति ॥ प्रथमेप्रयाणेब्रह्मरंध्रगमनरूपेप्रकाशमानांचिद्रूपत्वेनभासमानांप्रतिप्रयाणेब्रह्मरंध्रान्मूलाधारंपुनरागमनेअमृतायमानाम् आनंदामृतभरिताम ॥ अंतःपदव्यांसुषुम्नायामनुसंचरंतींगमनागमनेकुर्वतीमबलांपरांशक्तिंप्रपद्येशरणंगतोस्मीत्यर्थः॥नविद्यतेबलंयस्याःसकाशादन्यत्रेत्यबला ॥ इत्थंयोगिभिःकुंडलिनीसाक्षात्कर्तव्यायोगाभावेभावनावाकर्त्तव्या ॥ ३ ॥ तच्छिखामध्येसायाशिखामूलाधारस्थाचिदग्नेःशिखाकुंडलिनीतस्याःशिखायामध्येपरमात्माव्यवस्थितइतितैत्तिरीयश्रुत्युक्तातन्मध्येमांसच्चिदानंदरूपिणींध्यायेदित्यर्थः ॥ सर्वाःक्रियाःसंध्यावंदनांताः ॥ ४ ॥ होमांतेमत्प्रीत्यर्थमग्निहोत्रहोमान्तेइत्यर्थः ॥ ५ ॥

भूतशुद्धिमातृकान्यासौप्रसिद्धौगौरवान्नलिख्येते ॥ हृल्लेखामातृकेति ॥ हृल्लेखामायाबीजंप्रत्यक्षरंमायाबीजंपूर्वंदत्त्वामातृकान्यासोयःकर्तव्यःसहृल्लेखामातृकान्यासः ॥ शारदायांद्
विधमातृकान्यासेषुप्रसिद्धः ॥ ६ ॥ ७ ॥ अधर्मादिभिरिति ॥ धर्मज्ञानवैराग्यैश्वर्यान्विदिक्षुपीठखुरत्वेनभावयेत् ॥ अधर्माज्ञानावैराग्यानैश्वर्यान्पूर्वादिचतुर्दिक्षुपाठमात्रत्वेनभावयेत्
तत्पीठोपरि मध्येऽनंतायनमः ॥ पद्मायनमः ॥ अंसूर्यमंडलायनमः ॥ मंवह्निमंडलायनमः ॥ संसत्त्वायनमः ॥ रंरजसेनमः ॥ तंतमसेनमः ॥ पूर्वादिदिक्षु ॥ आंआत्मनेनमः
अंअंतरात्मनेनमः ॥ पंपरमात्मनेनमः॥ह्रींज्ञानात्मनेनमः ॥ ततःपद्मस्यपूर्वादिदले ॥ जयायैनमः॥ विजयायैनमः ॥ अपराजितायैनमः ॥ नित्यायैनमः ॥ विलासिन्यैनमः॥दोग्ध्यै
नमः ॥ अघोरायैनमः मध्येमंगलायैनमः ॥ इतिपीठशक्तीःपूजयेत् ॥ इदंशारदायांस्पष्टम् ॥८॥ ततःप्राणायामैर्विकसितेहृत्पद्मेपंचप्रेतासनेदेवींध्यायेदित्याह । ततोध्यायेदिति ॥९
पञ्चप्रेतानाह ॥ ब्रह्माविष्णुश्चेति ॥ १० ॥ किमर्थमेतेत्वदासनतांगताइतितत्राह । पञ्चभूतात्मकाह्येतेइति॥भूम्यादिपञ्चभूतानामेतेऽधिपतयोऽहंतुदेवीतेषामुत्पादकंयदव्यक्तंमायाविशि

भूतशुद्धिंपुराकृत्वामातृकान्यासमेवच ॥ हृल्लेखामातृकान्यासंनित्यमेवसमाचरेत् ॥ ६ ॥ मूलाधारेहकारंचहृदयेचरकारकम् ॥ भ्रूमध्येतद्व
दीकारंह्रींकारंमस्तकेन्यसेत् ॥ ७ ॥तत्तन्मंत्रोदितानन्यान्न्यासान्सर्वान्समाचरेत् ॥ कल्पयेत्स्वात्मनोदेहेपीठंधर्मादिभिःपुनः ॥ ८ ॥ ततो
ध्यायेन्महादेवींप्राणायामैर्विजृंभिते ॥ हृदंभोजेममस्थानेपञ्चप्रेतासनेबुधः ॥ ९ ॥ ब्रह्माविष्णुश्चरुद्रश्चईश्वरश्चसदाशिवः ॥ एतेपंचमहाप्रेताः
पादमूलेममस्थिताः ॥ १० ॥ पंचभूतात्मकाह्येतेपञ्चावस्थात्मकाअपि॥अहंत्वव्यक्तचिद्रूपातदतीताऽस्मिसर्वथा ॥ ११ ॥ ततोविष्टरतांया
ताःशक्तितंत्रेषुसर्वदा ॥ ध्यात्वैवंमानसैर्भोगैःपूजयेन्मांजपेदपि ॥ १२ ॥ जपंसमर्प्यश्रीदेव्यैततोऽर्घ्यस्थापनंचरेत् ॥ पात्रासादनकंकृत्वापूजा
द्रव्याणिशोधयेत् ॥ १३ ॥ जलेनतेनमनुनाचास्त्रमंत्रेणदेशिकः॥दिग्बंधंचपुराकृत्वागुरून्नत्वाततःपरम्॥ १४॥ तदनुज्ञांसमादायबाह्यपीठेततः
परम् ॥ हृदिस्थांभावितांमूर्तिंममदिव्यांमनोहराम् ॥ १५ ॥ आवाहयेत्ततःपीठेप्राणस्थापनविद्यया ॥ आसनावाहनेचाऽर्घ्यंपाद्याद्याचमनंत
था ॥१६॥ स्नानंवासोद्वयंचैवभूषणानिचसर्वशः ॥ गंधपुष्पंयथायोग्यंदत्त्वादेव्यैस्वभक्तितः॥ १७॥ यन्त्रस्थानामावृतीनांपूजनंसम्यगाचरेत्
॥ प्रतिवारमशक्तानांशुक्रवारोनियम्यते ॥ १८ ॥

ष्टंब्रह्मतद्रूपिणीतेभ्योऽधिका तथातेब्रह्मादयोजाग्रत्स्वप्नसुषुप्तितुर्यातीतरूपपंचावस्थाधिपतयोऽहंतुदेवीतुर्यातीतावस्थातोऽप्यधिकंयद्ब्रह्मतद्रूपिणी तस्मात्तेममाऽऽसनतांगताइत्यर्थः॥११
तत्रब्रह्मादयश्चत्वारोमंचकखुराः ॥ सदाशिवस्तुफलकस्थानीयःकल्पनीयइतिबोध्यम् ॥ एवंहृदयेप्रथमतोमानसोपचारैःपूजयित्वायथाशक्तिमूलमंत्रंजपित्वाजपंदेव्यैसमर्प्यबाह्यपूजा
मर्घ्यस्थापनंचरेदित्याह । ध्यात्वैवमिति ॥ १२ ॥ अर्घ्यस्थापनप्रकारःशारदायांद्रष्टव्योगौरवान्नेहोच्यते ॥ १३ ॥ अस्त्रमन्त्रेणफट्मन्त्राभ्युक्षितजलेनपूजाद्रव्याणिशोधयेदित्यर्थः
दिग्बंधमिति ॥ फट्मंत्रेणस्वपरितोऽग्निप्राकारंभावयेदित्यर्थः ॥ १४ ॥ बाह्यपीठेपूर्वोक्तेयंत्रादौ॥१५॥प्राणस्थापनविद्ययाप्राणप्रतिष्ठामंत्रेण ॥ १६॥१७॥ पुष्पांतंपूजांकृत्वायंत्रस्था
मावृतीनामावरणदेवतानांपूजनंकुर्यादित्याह । यंत्रस्थानामिति ॥ ताश्चदेवतास्तत्तन्मूर्तिकल्पोक्ताग्राह्याः ॥ प्रतिदिनमावरणदेवतापूजनंकर्तुमशक्तश्चेच्छुक्रवारेऽवश्यंकुर्यादित्यर्थः॥१८

आवरणदेवतासुभावनामाह।मूलदेवीति ॥ १९ ॥ पुनरावृत्तीति इत्थमावरणदेवतायथास्थानेषुस्थिताध्यात्वासंपूज्यपुनःसावरणांसायुधांसशक्तिकांश्रीभुवनेश्वरींगंधादिदक्षिणांते
रुपचारैः पूजयेदित्यर्थः ॥ २० ॥ त्वत्कृतेनेति ॥ त्वयाहिमालयेनकृतंयत्सहस्रनामस्तोत्रंममतेनमांतोषयेदित्यर्थः ॥ अनेनैवज्ञापकेनहिमालयेनदेवीदर्शनेजातेसहस्रनामस्तोत्रे
णदेवीस्तुतेतिबोधितम् । तच्चसहस्रनामस्तोत्रंयद्यप्यस्मिनपुराणेनास्ति तथापिकूर्मपुराणेद्वादशाध्यायेवर्ततेतद्ग्राह्यम् ॥ तत्राऽप्येतत्प्रसंगेनैवसहस्रनामकथनात् ॥ चकारेणनित्यमूल
मंत्रजपंकृत्वापश्चात्सहस्रनामस्तोत्रंपठेदित्यर्थः ॥ २१ ॥ कवचेनतंत्रादिषुप्रोक्तेन अहंरुद्रेभिरितिदेवीसूक्तेनेत्यन्वयः ॥ देव्यथर्वशिरोनामसर्वेवैदेवादेवीमुपतस्थुरित्यादिकंहृल्लेखोप

मूलदेवीप्रभारूपाःस्मर्तव्याअंगदेवताः ॥ तत्प्रभापटलव्याप्तंत्रैलोक्यंचविचिंतयेत् ॥ १९ ॥ पुनरावृत्तिसहितांमूलदेवींचपूजयेत् ॥ गंधादि
भिःसुगंधैस्तुतथापुष्पैःसुवासितैः ॥ २० ॥ नैवेद्यैस्तर्पणैश्चैवतांबूलैर्दक्षिणादिभिः ॥ तोषयेन्मांत्वत्कृतेननाम्नांसाहस्रकेणच ॥ २१ ॥ कवचे
नचसूक्तेनाऽहंरुद्रेभिरितिप्रभो ॥ देव्यथर्वशिरोमंत्रैर्हृल्लेखोपनिषद्भवैः ॥ २२ ॥ महाविद्यामहामंत्रैस्तोषयेन्मांमुहुर्मुहुः ॥ क्षमापयेज्जगद्धात्रीं
प्रेमार्द्रहृदयोनरः ॥ २३ ॥ पुलकांकितसर्वांगैर्बाष्परुद्धाक्षिनिःस्वनः ॥ नृत्यगीतादिघोषेणतोषयेन्मांमुहुर्मुहुः ॥ २४ ॥ वेदपारायणैश्चैवपुरा
णैःसकलैरपि ॥ प्रतिपाद्यायतोऽहं वैतस्मात्तैस्तोषयेत्तुमाम् ॥ २५ ॥ निजंसर्वस्वमपिमेसदेहंनित्यशोऽर्पयेत् ॥ नित्यहोमंततःकुर्याद्ब्राह्मणां
श्चसुवासिनीः ॥ २६ ॥ बटुकान्पामरानन्यान्देवीबुद्ध्यातुभोजयेत् ॥ नत्वापुनःस्वहृदयेव्युत्क्रमेणविसर्जयेत् ॥ २७ ॥ सर्वंहृल्लेखयाकु
र्यात्पूजनंममसुव्रत ॥ हृल्लेखासर्वमंत्राणांनायिकापरमास्मृता ॥ २८ ॥ हृल्लेखादर्पणेनित्यमहंतत्प्रतिबिंबिता ॥ तस्माद्धृल्लेखयादत्तंसर्वमंत्रैः
समर्पितम् ॥ २९ ॥ गुरुंसंपूज्यभूषाद्यैःकृतकृत्यत्वमावहेत् ॥ यएवंपूजयेद्देवींश्रीमद्भुवनसुंदरीम् ॥ ३० ॥ नतस्यदुर्लभंकिंचित्कदाचित्क्वचि
दस्तिहि ॥ देहांतेतुममणिद्वीपंममयात्येवसर्वथा ॥ ३१ ॥ ज्ञेयोदेवीस्वरूपोऽसौदेवानित्यंनमंतितम् ॥ इतितेकथितंराजन्महादेव्याःप्रपूजन
म् ॥ ३२ ॥ विमृश्यैतदशेषेणाप्यधिकारानुरूपतः ॥ कुरुमेपूजनंतेनकृतार्थस्त्वंभविष्यसि ॥ ३३ ॥ इदंतुगीताशास्त्रंमेनाऽशिष्यायवदेत्क्वचि
त् ॥ नाऽभक्तायप्रदातव्यंनधूर्तायचदुर्हृदे ॥ ३४ ॥ एतत्प्रकाशनंमातुरुद्घाटनमुरोजयोः ॥ तस्मादवश्यंयत्नेनगोपनीयमिदंसदा ॥ ३५ ॥ देयं
भक्तायशिष्यायज्येष्ठपुत्रायचैवहि ॥ सुशीलायसुवेषायदेवीभक्तियुतायच ॥ ३६ ॥ श्राद्धकालेपठेदेतद्ब्राह्मणानांसमीपतः ॥ तृप्तास्तत्पितरः
सर्वेप्रयांतिपरमंपदम् ॥ ३७ ॥ व्यासउवाच ॥ इत्युक्त्वासाभगवतीतत्रैवांतरधीयत ॥ देवाश्चमुदिताःसर्वेदेवीदर्शनतोऽभवन् ॥ ३८ ॥

निषत् ॥ भुवनेश्वर्याउपनिषत् ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ सर्वस्वमपीति ॥ स्वदेहसहितंसर्वस्वंदेव्यैसमर्पयेदित्यर्थः ॥ २६ ॥ व्युत्क्रमेणसंहारमुद्रया ॥ २७ ॥ पूर्वपूजायांयेउ
पचारादेयास्तेसर्वेमायाबीजमंत्रमुच्चार्यदेयाइत्याह ॥ सर्वंहृल्लेखयेति ॥ २८ ॥ कुतःसर्वमंत्राणांनायिकेतिचेन्ममतस्मिन्मंत्रेप्रत्यासत्त्यातिशयादित्याह । हृल्लेखादर्पणेइति ॥ तथाचब्र
ह्मांडपुराणे ॥ ह्रींकारादर्शबिंबिकेति ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ उरोजयोःस्तनयोः ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥

ततोदेवीवरप्रदानानंतरम् ॥ इयंचगौर्याउत्पत्तिर्ज्येष्ठशुक्लचतुर्थ्यामभवत् ॥ तदुक्तंकृत्यरत्नावल्याम् ॥ ज्येष्ठशुक्लचतुर्थ्यांतुजातापूर्वंगुमासती ॥ तस्मात्सातत्रसंपूज्यासर्वैःसौभाग्यहेतवे ।
उपहारैश्चविविधैर्गीतनृत्योत्सवादिभिः होमैःपयोभिर्वस्त्रैश्चपत्रपुष्पैःसुगंधिभिरिति ॥ साचोत्पत्तिररुणोदयवेलायाम् ॥ तदुक्तंमात्स्येतारकासुरयुद्धप्रस्तावे ॥ ततोजगत्परित्राणहेतुं
मगिरेःप्रिया ॥ ब्राह्ममुहूर्तेसुभगेप्रासूयतगुहारणीमिति ॥ ३९ ॥ इत्थंगौर्याउत्पत्तिंतस्याःशिवस्यप्राप्तिंचसविस्तरमुपवर्ण्यलक्ष्म्युत्पत्तिंतस्याविष्णुप्राप्तिंचसंक्षेपेणवदति । समुद्रमंथ
इति ॥ रत्नान्यासूरत्नान्युत्पन्नानीत्यर्थः ॥ ४० ॥ तत्रेति ॥ तस्मिन्नपिसमयेदेवैर्देवीपरमाशक्तिःस्तुता किमर्थंलक्ष्मीप्राप्त्यर्थम् ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ विस्तरस्तुमत्कृत

व्यासउवाच ॥ ततोहिमालयेजज्ञेदेवीहैमवतीतुसा ॥ यागौरीतिप्रसिद्धाऽसीद्दत्तासाशंकरायच ॥ ३९ ॥ ततःस्कंदःसमुद्भूतस्तारकस्तेनपातितः ॥ समुद्रमंथनेपूर्वंरत्नान्यासुर्नराधिप ॥ ४० ॥ तत्रदेवैःस्तुतादेवीलक्ष्मीप्राप्त्यर्थमादरात् ॥ तेषामनुग्रहार्थायनिर्गतातुरमाततः ॥ ४१ ॥ वैकुंठायसुरैर्दत्तातेनतस्ययशमोभवत् ॥ इतितेकथितंराजन्देवीमाहात्म्यमुत्तमम् ॥ ४२ ॥ गौरीलक्ष्म्योःसमुद्भूतिविषयंसर्वकामदम् ॥ नवाच्यंत्वेतदन्यस्मैरहस्यंकथितंयतः ॥ ४३ ॥ गीतारहस्यभूतेयंगोपनीयाप्रयत्नतः ॥ सर्वमुक्तंसमासेनयत्पृष्टंतत्त्वयाऽनघ ॥ ४४ ॥ पवित्रंपावनंदिव्यंकिंभूयःश्रोतुमिच्छसि ॥ इतिश्रीदेवीभागवतेमहापुराणेऽष्टादशसाहस्र्यांसंहितायांसप्तमस्कंधेदेवीगीतायांचत्वारिंशोऽध्यायः ॥ ४० ॥
॥ श्रीरस्तु ॥ स्कंधश्चायंसमाप्तः ॥ ७ ॥

खशरव्यश्वि (२२५०) पद्यैस्तुद्वैपायनमुखच्युतैः ॥ श्रीमद्भागवतस्याऽस्यसप्तमस्कंधईरितः ॥ १ ॥

वीगीतावृहट्टीकायांद्रष्टव्यः ॥ श्रीमच्छैवकुलोत्पन्नोरंगनाथात्मजःसुधीः ॥ श्रीलक्ष्मीगर्भसंभूतोनीलकंठोभिधानतः ॥ १ ॥ देवीभागवतस्याऽस्यव्याख्यानरहितस्यच ॥ व्याख्यांयःकृ
वान्सम्यक्तिलकाख्यांमहत्तराम् ॥ २ ॥ सप्तमस्कंधएतस्याःसमाप्तोभूच्छुभार्थदः ॥ प्रीयतांतेनमेऽनंतकोटिब्रह्मांडनायिका ॥ ३ ॥ इतिश्रीशैवकुलोत्पन्नरंगनाथात्मजलक्ष्मीगर्भज
नकंठकृतेश्रीमद्देवीभागवततिलकेसप्तमस्कंधेदेवीगीतायांचत्वारिंशोऽध्यायः ॥ ४० ॥ ॥ छ ॥ ॥ स्कंधश्चायं समाप्तः ॥ ७ ॥